750

नं० ७५०-घ

गोवर्धनसप्तशती व्यंग्यार्थदीप

नाख्यटीकासहिता

नं० ७५०-घ

पत्राणि २२८

नं० ७५०-घ

गोवर्धनसप्तशती व्यंग्यार्थ संदीपनम (काव्यम) (संपूर्णम)

पत्राणि २१८

गोवर्द्धनसप्तशतिकासटीका प. २१८

275

ॐ श्रीगणेशायनमः ॐ सर्वेशायजनाःसदायतहृदासन्तंप्रदायादलंयज्ज्ञानायक
गो॰टी॰ णादगौतममतानालोच्यतत्त्वार्थदान् वेदान्तान्परिशीलयन्तिरहसिस्वानन्दकंदा
करंवन्देतंजगदीश्वरंदयितयासानन्दमालिंगितम् १ यत्पादांबुजमज्जभूप्रभृतयो
१ देवाःसदेवांतरेध्यायन्तिग्लपयन्तिदुःखनिवहंलीलामनुष्याकृतिं फुल्लेंदीवरमि
त्रेनेत्रमतसीपुष्पावभासंसदाश्रीरामंकलयामिचेतसिपरंचैतन्यमात्रात्मकम् २ प
द्याःशब्दगुणैरभेदैरपरिमितनवैरर्थजातैश्चयुक्तानानालंकाररम्याःग्रथितगुणगणामा
धुर्येणरूपेणा वाक्सृष्टिर्यत्प्रसादात्प्रसरतिरसनेनापितैर्दन्तिमेषान्नित्यंचित्तेःतुरक्तेवस
तुममसुखंभारतीसारसाब्जा ३ गोवर्द्धनोक्तिसर्वस्वदानं निदानमेतद्ग्रन्थार्थदीपन
ंश्रव्यंचमत्कृतीनाम् भूयादनन्तविबुधेनविधीयमानंप्रीत्येसदासकलपण्डितमण्ड
लीनाम् ४ आर्यार्थग्रहणेतावदार्याःप्रबाधिकारिणः अतोऽत्रदृष्टिस्तैरेवकार्यानान्यैः
कदाचन ५ गम्भीरार्थरसार्थप्राप्तौनियतवचसामाशयज्ञुषांगुणालंकाराणांभवति
घटनासततंरे श्रोताहेतोर्येनाविपुलमतिनातत्रविषयेनियोज्यंयेनानःसततस १

एवमेवाधवसति ६ सतं ज्यदोषं गुणपवद्दृष्टिर्विधीयतामित्यः फलं वचो मे विहायनी
ंसमकललेपिहंसः पयः प्रगृह्णात्नुपदेशतः किम् ७ विशिष्टशिष्टश्कर्तव्यतापरि
प्राप्तमंगलमनुषंगतो श्लोकत्रात्मंगलाघोपनिवध्नाति पाणिग्रहइति भूतिभू
षितभस्मनाऽलंकृतं भस्मनोभूषणत्वं मनोभववीर्यत्वेन यत्तभूत्यापैश्वर्येणेतिवा
ख्यानं तदेशामित्येनेनगतार्थत्वादनुक्तत्वानुपयुक्तत्वाद्वापेत्यम् पाणिग्रहेत्यत्रार्थादस्य

पाणिग्रहे पुलकितं वपुरैशं भूतिभूषितं जयति ॥

तानुक्तकामिन्याः पुलकितेनेत्जातरोमाञ्चम् सात्त्विकभावोदयादिति भावः ऐशं ईशस्य
मेवाधि चैवज्ञादिपदवदीशपदस्य कर्तृगोरत्वादिमत्छरीरेपाद्दितात्मनिशक्तौ गौरवात्
लाघवान्नाद्दृशशरीरपवशक्तत्वान्नित्यज्ञानादिमदात्मनि लक्षणा यदाईशऐश्वर्ये इति
धातोरचितनिष्पन्नेशपदेनशक्त्या जगत्कर्तृत्वाद्यैश्वर्यवद्बोध्यते तत्संबंधस्य शरीरान्तर
सत्वेपि भूषितत्वादिविशेषणमहिम्नाऽशंकनीयत्वमायाति पुष्टि एवं च मनोभूः भस्मसं
बंधसंबंधात्कर्षप्रणालितया गम्यत्वमज्यते वपुर्जयति

गोटी· यद्वा भूतिभूषितामित्यनेन भूषणसामान्याभावप्रतिपादनेनापि सर्वोत्कर्षशालित्वं देवी
पाणिग्रहणजन्यपुलककवचत्वाहेतुः जयतीत्यनेन ईशस्य सर्वोत्कर्षशालित्वप्रतिपादनेन
२ सर्वान्तर्गते स्वस्मिन्नपकर्षप्रतिपादनान्नतिरेव द्योत्यते भस्मावशेषोपि एवं चांकुरीभावा
नर्हत्वेपि तद्भवनेन देवीपाणिस्पर्शस्याद्भुतत्वमावेद्यते मनोभूः एवं च मनसः कारणताप्र
तिपादनेन तस्यान्तर्गततया द्रुषितजन्यमदनसंजातभस्मसंसर्गयोग्यत्वमुच्यते विशिष्या
नाकलनीयं रूपेपि भवनयोग्यत्वेन वपुर्विशेषभवनयोग्यत्वं वा यस्मिन् वपुषि अंकुरि

अंकुरित इव मनोभूर्यस्मिन् भस्मावशेषोपि १

त इव संजातांकुर इवेति भस्मसंसर्गिरोमांचे अंकुरत्वेनोक्ता एवं यथांकुरसंजातमहत्तरतरुकि
सलयकुसुमफलादिना उपजनोपकारः तथैतदंकुरभाविकुमारफलादिना तारकादि
वधेन सकलजनोपकारो भावितेति ध्वन्यते अग्रांकुरितत्वेन पाणिस्पर्शस्याद्भुतरूपत्व
वस्तुना वस्तु व्यज्यते १ इदमित्यनेनानुपलापानर्हत्वमथ वा जगद्धिताशनविदितविभव
मित्यव्यज्यते ॥

विषमावम किंतसंहरणु इतिसातंकं सातंकत्वंचसकलजगद्विनाशेपुनस्तद्विधान
दुष्करत्वनिर्णयेनपितामहेन एवंचभ्रमयोग्यत्वंहरस्यचलज्जायोग्यत्वंख्यापते प्रातह
क्तः प्रातरित्यनेनकज्जलेस्फुटदर्शनेयोग्यत्वंख्यापते अतःसलज्जः ननुत्र्यपावान् पिता
महेन कज्जलत्वेनाज्ञानात् कज्जलमलिनाधरःनेत्रचुम्बनादितिभावः शम्भुः एवंचका
मिनीश्लीत्यतिशयशालित्वंद्योत्यते जयति पितामहसंत्रासजनकगरलगिलनेनत्र

मावमसंहरणुविषमिदमितिसातङ्कः पितामहेनोक्तः प्रातर्जयतिसलज्जःकज्जल
मलिनाधरःशम्भुः २ जयतिप्रियापदान्तेगरलग्रैवेयकःस्मरारातिः ॥

स्मराः प्रार्थनयासुभगकामिनीरतचिह्नवेत्तनवा यद्यपिमावमीरित्यवमीरित्येववक्तंयु
क्तं तथापिप्रतिषेधार्थीयमाशब्दःयद्वासमर्थस्तेत्रमागच्छतंतहतेमाभयंदेवदत्तस्येतिभा
ष्यप्रयोगात्माङिःलाङित्यःनितमम् २ गरलंग्रैवेयकंकंठभूषायस्यसःस्मरारातिःप्रियापदा
न्तेजयति एवंचकुपितकामिनीप्रसादनकालेयनायापरमपुरुषार्थत्वंव्यज्यते गलग्रैवेयक

गो॰टी॰ इत्यनेन जीवनायोग्यत्वं स्मरागाग्निरित्यनेन स्मरबाधावत्वेन क्वचिदपि सुखावस्थानयो
ग्यत्वं व्यज्यते एवं चैतादृशस्यापि सर्वोत्कर्षशालिने प्रियायपदान्तेः वस्थितिरेव हेतुः अतः
२ प्रियापदान्तावस्थितेर्नान्यदधिकतरं वस्त्विति द्योत्यते यद्वा गरलग्रैवेयक इत्यनेन जीव
3 नानिस्पृहत्वं एवं चैतादृशस्यापि कुपितकामिनीप्रसादनलंपटत्वं किमुतान्येषामिति
ध्वन्यते गलबद्धखड्गः विषमविशिखे एवं च शरणार्हत्वं व्यज्यते शरणं विशन्निव गच्छ
न्निव विषमिव विशिखे विशन्निवेदं तत्र या विषमविशिखस्यापि प्रियपदसान्निध्येनाधिक

विषमविशिखे विशन्निव शरणं गलबद्धकरवालः २ जयति ललाटकटाक्षः
शशिमौलेः पक्ष्मलः प्रियाप्रणतौ

त्वं किं पुनरन्यस्येति द्योत्यते अन्योपि प्रायस्तु गले बद्धा शरणं गच्छतीति लौकिकम् २। शशिमौलेः
एवं च सकललोकस्याप्येतादृशादरसंपादनेन संतापापत्तिभीरुत्वं व्यज्यते तेन च कुपिता कामि
नीप्रसादनेन वशपकर्तृत्वं पक्ष्मलः प्रशस्तपक्ष्मवान् पक्ष्मलपदेन कोमलत्वादार्द्रत्वं च
ललाटकटाक्षः एवं च भ्रूमध्यसंबंधित्वं द्योत्यते तेन धनुर्निहितबाणात्तीक्ष्णादार्ढ्यम् प्रि २

यापूर्णानोप्रियाविषयकहर्ष्रपूर्णानोमत्पांजयति चाटुकवचनाघसाध्यमानापनोदनका
र्यकारित्वेनेतिभावः स्मरेणसकंटकः एवच्चनिस्मरणानर्हत्वंद्योत्यतेधनुषिनिहितःनेत्र
शींघ्रपरित्यक्तः एवंचमहादेवंधदार्ढ्यभेदनाविशेषकारित्वं तेनचमानलव्धभंगेःतिशी
घ्रविधेयत्वंद्योत्यते केतकेषुरिव स्मरस्यपुष्पमायकत्वादितिभावः एवंचमानापनोद
नंद्योत्यते केचित्तु प्रियाकर्तृकमेवापूर्णानोममान्मथविकारः ललाटकटाक्षोजयतीत्य

धनुषिस्मरेणानिहितःसकंटकःकेतकेषुरिव ४ जयतिजटाकिंजल्कंगंगा
मधुमुंडवलवीजमयम् गलगरलपंककसंभवंमंभोरुहमाननंशंभोः ५

पिवदन्ति ४ जटाः किंजल्कानियत्रेतिरूपकः एवमग्रेपि ५ कंकणरूपफणीपीयमान
मपिकंकणपदेनप्रत्यक्षिकत्वंद्योत्यते फणीपदेनभूषणायोग्यत्वं तेनचसर्वदाविलोकन
योग्यत्वंध्वन्यते पीयमानमित्यनेनज्ञानयोग्यत्वंध्वन्यते संध्यासलिलांजलिं राजदन्तादिव
द्वजलेः सलिलमितिममासः संध्यापदेनतदेकाचित्तावरूपकत्वंद्योत्यते अंजलिपदेभ्रुय
त्वंद्योत्यते तेनचतत्पानस्यविलंवसाध्यत्वेनावश्यपज्ञेयत्वं अविजानन् अत्रेहेतुमाह ॥

गौ॰टी॰ गौरीमुखार्पितमनाः गौरीमुखे समर्पितचित्त इत्यर्थः गौरीत्यनेन मनःसंलग्नतायोग्यत्वं
मुखे ध्वन्यते अर्पितपदेन ग्रहणयोग्यत्वं द्योत्यते एवं चैतादृशविषयज्ञानाभावेनात्यंतास
ध क्तिर्गौर्या गिरिशस्य च ध्वन्यते अत एव विजया गौरीसखी तया सहितः शिवो जयति एतादृश
परिहासस्याप्युत्कर्षाधायकत्वादिति भावः ५ सलिलांजलिर्जयति एवं चांजलिजलप्रतिबिं
५ बितगौरीवदनविलोकनसंजातकंपरूपसात्त्विकभावविश्लथकरगलितत्वेऽपि स्वेदरूपसात्ति

मंध्यासलिलांजलिमपि कंकणफणिपीयमानमविजानन् गौरीमुखार्पितमना विज
यहसितः शिवो जयति ६ प्रतिबिंबितगौरीमुखविलोकनोत्कंपशिथिलकरगलितः
स्वेदभरपूर्यमाणः शंभोः सलिलांजलिर्जयति ७ प्रणयकुपितप्रियापदलाक्षासंध्या
नुबंधमधुरेन्दुः नखदलयकनककनिकषग्रावग्रीवः शिवो जयति ८ ॥

कभावभराकस्मिककंपरसवीतार्घशालित्वमिति भावः ७ प्रणयेन नवाल्पत्वं कुपितायाः प्रिया ॥ ७ ॥
एवं च चरणप्रणामयोग्यत्वं ध्वन्यते तथा च चरणलाक्षारूपसंध्यासंबंधिहृद्यचन्द्रो यस्य तस्याः
पार्वत्याः कंकणकनककस्य निकषोपलरूपा ग्रीवा यस्य एवं च मानापनोदनात्कंठग्रहपुरः श्रीः
सरमालिंगनादि ध्वन्यते एतादृशः शिवो जयति प्रियाप्रसादादिति भावः यद्वा स्वकार्योद्देश
विहितप्रियाप्रणामेन संध्याचंद्रमसोरपि संगमसंपादनात् सामान्यपरोपकारित्वलाभादिति ध

गौर्याश्चरणांगुलिमध्यगुल्फेषु अत्र मध्यसंभागताभावान्नैकवद्भावः मध्यमपदलोपी समा
सो वा पूर्णेंदुर्निर्विंदुर्यया पूर्वं नखेष्वर्धचंद्रत्वादिति भावः द्विगुणीकृतो मंजीरो यया पूर्वं मंजी
रस्यैकगुणत्वादिति भावः प्रेमणः श्रृंखला यया एवं च पूर्वं सुवर्णाभरणान्तरवत्त्वेपि प्रेमाख्य
तिसंपादकाभिनवभूषणत्वादिति भावः एवं च यथायथा मानापनोदनं तथा तथा शिरश्चर
णसंयोगाधिकतरः संवृत्त इति भावः एवं च महामानिनीचरणे मस्तकस्थापनेपि भीति
रित्यावेद्यते एतादृशी हरचंद्रलेखा जयति युगपदनेककार्यसंपादनादिति भावः ९ ॥

पूर्णेन्दुर्निर्विन्दुर्द्विगुणितमञ्जीरप्रेमशृंखला जयति हरमौलिरेखा गौरीचरणांगुलि
मध्यगुल्फेषु ९ श्रीकरपिहितं चक्षुः सुखयतु वः पुंडरीकनयनस्य

पुंडरीकनयनस्य विष्णोः श्रीकरपिहितं रतरीतिवसनविहीनतया लज्जावशादिति भावः श्रियः क
रेण तु श्रियाच्छादिता वेति भावः अत एव करोतीति कर इति पदमन्वर्थं तेनानाभिप्रायेणास्य
पिरपदमस्यानवलोकनीयत्वं अनक्ति जघनमीदृशमागतमिवेक्षतेत्र तत्त्वा एवं च लक्ष्मीजघनदर्श
नलालसं तं अज्यते पिधानानर्थकं च अन्नसदृशं एवं च नाभिकमलभ्रान्त्यापिधानायोग्यत्वमाव
द्यते चक्षुः सुखयतु पिहितेपि हि गोलकेः स्वमार्गेणागत्य जघनविलोकनकारित

गी॰
टी॰
४

याः तिमलंपटेन नमस्त्वदाननस्य मुखप्राप्तिनिदानत्वात् याः त्वन्मुखजनकत्वेन स्मेति भावः नन्व
त्र पुण्डरीकनयनस्येत्यनेन कमलस्यादृश्यमिति हि द्वावः ज्ञानिमभिमित्यस्य ननु न त्वायाप्रयोजनमिति चेत्र
पुण्डरीकनयन इत्यत्र गूढं हि रेव यद्वा ज्ञपदस्य वत्सृता तात्पर्यान्यथानुपपत्त्या रक्तान्त्रलक्षणा प
वंचलक्ष्याः स्मितांभोजत्वेन नेत्रज्ञानेन पिरक्ताभजत्वेनाज्ञानानात्स्वरूपांगीकारेणोति भृतमार्गग
मनेन न वजत्वेन दर्शनकारित्वमपि न स्वीकरणपिहितत्वमिति व्यज्यते अन्योऽप्यसंतलंपटोऽरूपानरेण
निभृतमार्गेणाच गत्वा स्वकार्यं साधयतीति लौकिकम् केचित्तु रत्नमिति पक्षे रक्तं रत्नमेव ज्ञानि

जयनमिव दातुमागतम् ज्ञानिभं नाभिमुखं षिरणा १ श्रपांसं श्रीकुचकुंकुमपिंजरित
मुरामुरद्विषो जयति दिनमुखनभ इव कौस्तुभविभाकरो यदि भूषयति ११

तन्केरक्तानमेवकविसंप्रदायादिति वदंति १ श्रपामम् विष्णोः श्रपामत्वादिति भावः श्रीकुचकुं
कुमपिंजरितं एवं च दृढालिंगनमभिव्यज्यते तन्मुरद्विषउरः एवं च कठिनत्वमुरसि व्यज्यते
तेन च कठिनकुचकुंभसंघट्टनसहिष्णुत्वं जयति सर्वोत्कर्षेण लक्ष्मीदृढालिंगनहेतुः दिनमुखन
भ इव प्रातःकालीननभः स्वेतामलिनवत्वात्संध्यासंवलितत्वाच्च तथाविधोरसः सादृश्यम्
कौस्तुभ एव विभाकरः पचत्कौस्तुभवद्विभाकरः सूर्यः यत् उरो विभूषयति एवं च त्रिभुवना ४

धिपेनेनिरीक्ष्य स्वापि कौस्तुभाभरणाधारणमुदरवत्येनेकलोकयुगपत्प्रकाशाविश्रांतिवि
धानेनिदानं तात्वं नयति एवं च विभाकरादतिशयो व्यज्यते कौस्तुभ ११ ॥ सकौस्तुभं अनेनप्रति
तिबिंबितायाः प्रियायास्तनुर्यत्र यत् मकुरमिव वीक्ष्य लक्ष्मीः प्रहर्षायितं विपरीतरतमभ्यस्यति
तन्मधुभिदो वक्षः एवं च दार्ढ्यमावेद्यते स्वच्छता विशेषो वा जयति लक्ष्म्याः प्रहर्षायितेनाभ्या
सनिदानत्वेन सर्वोत्कर्षहेतुः अन्योन्यादर्शप्रतिबिंबमवलोक्यैवाऽन्यानवलोकनीयचेष्टावि

प्रतिबिंबितप्रियातनु सकौस्तुभं जयति मुरभिदो वक्षः हर्षायितमभ्यस्यति लक्ष्मी
र्यदनुवेक्ष्य मुकुरमिव १२ केलिचलांगुलिलंभितलक्ष्मीनाभिर्मुरारिशिशुचरणः
स जयति येन कृता श्रीरनुरूपा पद्मनाभस्य १३

शोभाभ्यासं करोतीति लौकिकम् १२ क्रीडाचपलांगुल्यालंभितः स्पृष्टो लक्ष्म्याः चरणसेवाका
८ रिण्या इति भावः नाभिर्येन अनन्तरं येन श्रीपद्मनाभस्यानुरूपा चरणानूपपद्मनाभीव नेति भावः
कृतामः मुरारिशिशुचरणो जयति ब्रह्मणोऽप्यसाध्यकार्यकारणादिति भावः १३ मुरारेः एवं
च सामर्थ्यमभिव्यज्यते तेन च तत्कृतेवापि तृभृगुचरणाहननमपि हि स्वेन तन्माहात्म्यवर्णनम् श्रीव

गो॰टी॰ त्सेन भृगुचरणचिह्नेन विवेशितः तत्सम्बंधवानित्यर्थः अग्रभागो यस्याः एतादृशी रोमा
वली उत ऊर्ध्वनालं यस्य एवं यन्नाभिनलिनं तच्छायेव एवं च रोमावल्या नालच्छायोत्प्रेक्षिता
५ श्रीवत्सेन च नलिनच्छायोत्प्रेक्षा वा॰ उन्नायि महांतं तापमः पदं त कमलच्छायासंतापपने
5 दकत्वादिति भावः १४ सप्तमखाः क्रतूनां तत्रागणामग्निष्टोमादीनां समाहारः सप्ततंत्रीचितताया

रोमावलिर्मुरारेः श्रीवत्सनिवेशिताग्रभागा वः उन्नालनाभिनलिनच्छायेवोत्ता
पमपहरत्व १४ आदाय सप्ततंत्रीचितं ताविपंचीमिव त्रय्यीं गायन् मधुरं तुरंगव
दनोचितं स्तुतिर्जयति हरिर्मूर्द्धा १५

म्नां नत्प्रतिपादनपरामिति यावत् तंत्रं प्रधाने यागे चेति विश्वः एते तंत्रीलोहतंतुविशेषः
त्रयीं विपंचीमिवादाय मधुरं तुरंगवदनानां किन्नराणां गंधर्वाणां उचितं योग्यं एवं चैता
दृशगानकर्तृत्वाभावस्तेषामिति गम्यते गायन् हयमूर्द्धा हयग्रीवः एवं च तुरंगवदनोचि
तगानकर्तृत्वं हरिर्जयति एतादृशविलक्षणगानरूपगुणवत्वादिति भावः १५॥

येनजलनिधिजठरेऽलयोरैकार्णवनिधिविनेनधरणीस्थानदानेयोग्यत्वम् चिरमित्येनस्फुटि
तितिस्मारणायोग्यत्वंव्यज्यते निमग्नापि यैर्त्रैरिवफणिसमूहैः सहबलात्कारेणधरणीउद्धृ
ता समहावराहः एवंचैतदृष्टायाअतिदृढनवकमलाभांजठरांतर्गतत्वेनोक्तरूपफणि
समूहसहितयोराद्भावसामर्थ्यमेचितमिति व्यज्यते जयतीत्यनन्यसाध्यकार्यकरणादिति
भावः १५ ब्रह्माण्डकुंभमलंकरोतिते एवंचयथाकुंभकारेणनैकेशैलेशकालाद्यास्त्रब्रह्माण्डक
रणाइतिव्यज्यते भुजगस्याकारइवाकारोयस्यतं एवंचवास्तवेतद्रूपंयाथात्म्येननिर्णी

सजयतिमहावराहोजलनिधिजठरेचिरंनिमग्नापि येनोर्द्धैरिवसहसाफणिगणैर्व
लादुद्धृताधरणी १६ ब्रह्माण्डकुंभकारंभुजगाकारंजनार्दनंनौमिस्फारयत्फणाच
क्रधरणीशरावश्रियंवहति १७

तुमशक्यमितिव्यज्यते जनार्दनं एवंचनंदीतिस्वरूपविधेयतिध्व
न्यते तेनचैतदाज्ञानोल्लंघनीयेतिस्फारे एवंचधरणीशरावश्रीसंपादनेयोग्यत्वंध्वन्यते यस्यफ
णासमूहः यद्वाफणाचक्रधरा एवंचमहत्वंव्यज्यते शरावस्यस्वल्पमृज्जन्यविशेषस्याश्रि
यंवहति नतत्प्रादृश्येनतु इतिभावः एवंपरमेश्वरभुजगस्यफणातिविशालत्वंध्वन्यते अस्यापि
कुलालस्यचक्रेशरावोभवतीतिलौकिकं अत्रधरणीशरावश्रियंवहतीत्यनेनवैतत्फणाचक्रे

स्फारत्वसिद्धावुत्तमकाद्यत्वे स्फारपदोपादानमनुचितमित्याभाति १७। प्रियेशंकरेशि
रसाचरणास्मरशिखिकोपापनोदनायप्रणतिकादि श्रीमति शंकरमभिव्याप्य जयवतः स
रस्यजयस्तंभइव चंडीजंघाद्वयः कांडेविशेषाजयति स्वतः सुखाविशेषजनकतयातच्छवि
षयसुखपराङ्मुखस्याप्यानादृप्यः वश्यासंपादनादितिभावः एवं चैहिकामुष्मिकसुखा
पेक्षयास्मीमिति नीसंगमसुखेऽधिकतरत्वमावेद्य १८ येनपंभरपि अपिनाविलासेरनव

गौरीजंघाकांडः शिरसाचरणास्पर्शिप्रियेजयति शंकरपर्यंतजित्वोतीरस्तंभः
स्मरस्येव १८ उन्नालनाभिपंकेरुहइवयेनावभातिशंभुरपि जयतिपुरुषायि
तायास्तदाननं शैलकन्यायाः १९

तारत्वेननाभिपंकेरुहत्वमायोग्यत्वमवसीयते ऊर्ध्वनालं यन्नाभिपंकेरुहं तद्वानिव यद्वा
विस्मारित्वेत्यर्थः एवं च शरीरस्यनालसाम्यप्रदर्शनात्कृशांगीत्वमभिव्यज्यते आभाति पु
रुषायितायाः शैलकन्यायाः एवं च दर्शने तेनचपुरुषायितसंपादनयोग्यत्वं व्यज्यते तत्
श्राननंजयति अघटितघटनापटुत्वादितिभावः १९ अंकेनिलीनोगजाननःशंकया
स्तनयोः कुंभकुंभस्यादितिभावः आकुलःकथं मां विहायैनमेवसंगोप्य बहुकालस्तन्य ६

प्रयच्छतीति धियेति भावः यद्वा नयननयिधानक्रीडायां राज्ञाननेनांकपवलीनो ननत्वन्यत्रगतश्रुति
मत्येति भावः अकुलपदेन शीघ्रमविचरितकार्यकारित्वमुच्यते यो वाकुलेयस्तारकजित् ते
नहृतवसनो गजाननानिर्णायार्थमिति भावः सस्मितः कथमति गुप्तयोरप्याकस्मिकप्राकट्य
मिति धियेति भावः यो हरः एवं च स्वेन एव वसनहरणादिना तत्कार्यकारित्वं ध्वन्यते तेन करक
लितो करोतीति कर इति स्वेन तत्कार्यकारित्वेपि हरप्रेरितत्वेनाकलनेदोषाभावो ध्वन्यते हिमगि
रितनयायाः एवं च शैत्यसहितकाठिन्यं ध्वन्यते तेन चावश्यकरकलनयोग्यत्वं अत एव हर

अकनिलीनगजाननशंकाकुलवाहुलेयहृतवसनौ सस्मितहरकरकलितौ हिमगिरि
तनयास्तनौ जयतः २ कंठाचिन्तापि कुहूहुतिमात्रनिरस्तः पदान्तिके पतितः

तिस्मरमित्यपि युक्तं स्तनौ जयतः भ्रमवतः सेनाविष्कृतत्वेप्यन्यस्य स्वसंपादनादिति भावः
यद्वा गजाननषण्मुखविवाहनयोः सकलविघ्ननिवारकत्वकार्यमात्रपुरस्करणीयत्वे तारकवधहा
रकविम्बसंतोषःपोषकत्वनिदानस्तन्यवत्त्वादिति भावः यद्वा स्मरविरोधिनोप्यानंदजनकत्वा
दिति भावः २ कंठाचिन्तोप्यालिंगनाहोपि पदे दृष्टेः चन्द्राकारतयाकंठलग्नयोग्यापि कुहूहुति
मात्रेणानन्तकरतर्जनादिना पद्मनखाग्रादिना निरस्तः अत एव यस्याः पदान्तिके प्रणामार्थमि

गी॰
टी॰

८

तिभावः पदेवेगविनाशादितिभावः स्मरपारदृशः अर्द्धचंद्रशिखरत्वादितिभावः स्मरभल्ल
निभ इत्यनेन मानापनोदनसमर्थत्वं द्योत्यते यद्वा स्मरभल्लस्य निभं छद्म यस्मिन्सः निभंछद्मस
दृक्षयोरित्यभिधानात् एवं च नूपांतरसंपादनाद्दीप्यातिशयो द्योत्यते चंद्रशिखः शंभुः पतितः चं
द्रशिखर इत्यनेनोद्दीपकस्य चंद्रस्यापि मानानपनोदकत्वान्मानेवाद्भुत्वमभिव्यज्यते सा चंडी
जयति मदनास्त्रेनाराचादीनामप्यगणनादितिभावः २१ तन्नमः कपटे त्वनप्रसिद्धानःसरा

यस्माच्चंद्रशिखः स्मरभल्लनिभो जयति सा चंडी २१ तां नमस्यामि नापि हरिमपि तं वंदे क
पटकैटभीनूपं धैर्याद्विबाधरमधुलब्धैः पीयूषमपि मुमुचे २२॥

नःपि स्पृशंतितेस्वराल्लङ्घिन्नान् सर्वदास्वसमीचीनग्राहकानपि वंदे पीयूषादप्यधिकेमत
स्याऽपरामृतमिति नातिकत्वानेन समीचीनवस्तुग्राहकत्वादितिभावः तं कपटशून्यत्वेन प्र
सिद्धं कृतकपटकैटभीनूपं हरिमपि वंदे कपटात्त्वेनापि कपटाकरं दैत्यवंचनानिपुणकपटनूप
धारणादितिभावः यैरस्मैर्यस्याः कैटभ्याः अधरमधुनि लब्धैः मधुपदमुन्मादजनकत्वाद्यनक्ति
पीयूषमपि एवं च परित्यागानर्हत्वेः पितत्कारणेन कैटभीनूपविशेषशालित्वं ध्वन्यते २२॥

८

अर्पितवरणस्रजि एवं च समग्राग्रभावेन तात्त्विकरूपापरिचयो द्योत्यते बहुमाये एवं च रूपान्तरग्र
हणसामर्थ्यं व्यज्यते देवैरिति देवपदेन क्रीडारसिकतयानेकविधदेहधारणनिपुणत्व
मावेद्यते कैटभीरूपं दैत्यवञ्चनायेति भावः वहतीत्यति एवं च शान्त्यन्तिकत्वेनापलायनं द्रुतं
व्यज्यते सुरासुरहसिता कथं सर्वासुरूपान्विहाय यमीदृशो वृत इति अत एव लज्जाकुटिलेक्ष
णा किमियं कामिनेव पुरुषभ्रमान्मया वृतेति धियेति भावः लक्ष्मीर्जयति सर्वोपहासभवेऽ
प्यधैर्याकरणादिति भावः २३। कल्पीकृताहिः एवं च सर्पबाधायामप्यगणनेन रागातिश

देवैरर्पितवरणस्रजि बहुमाये वहति कैटभीरूपम् जयति सुरासुरहसिता लज्जाजिह्मे
क्षणा लक्ष्मीः २३ कल्पीकृताहिरगणितनगरुडो हाराभिहतविधिर्जयति

यो व्यज्यते अगणितनगरुडः एवं च सर्वेऽङ्गमनयोग्यत्वेन पतित्वेन विवेकशून्यतया वा स्वैरं न कथ
नयोग्यत्वेऽप्यनादरेणानयापि सर्प एव द्योत्यते हाराभिहतविधिः हारस्य नाभिसंबंधादिति भावः
आलिङ्गनान्तरायभूतहारस्य मार्गाद्दूरीकरणेऽपि तत्र पर्यवप्रेक्षणकौशलिज्ञानसंपादनेन लज्जाशून्यत्वेन
स एवावेद्यते यद्वा कथमद्यापि नाऽपसरतीति क्रोधान्निकटवर्तिहाराभिहननेन हारापायभीतिश्च

गी॰
टी॰
८
४

सतेनायंचहननक्रोधात्कुत्रकुत्रनवदिष्यतीतिज्ञानहीनतयाचसएववोवेष्टेते शतसंख्याकफ
णापीतस्थामः एवंचसंख्यायाः पानान्वयोऽसंभवीतिरूपणामपास्तं एवंचमरणाभीतिशून्यतेन
सएवध्वन्यते एवंविधः रागान्धायाः श्रियःकेलिः इवकेलिपरीहासाऽत्यमरः एवंचान्याभिर
गनाभिर्यद्रागप्रकटनंक्रियतेतन्निषेध्येतिभावः जयति एताद्दशप्रतिवेधकसमूहेपिसंजा
यमानत्वादितिभावः अत्रतल्पीकृतादित्यादिनाभुजगतयारागातिशयप्रतिपादनाद्रागा
न्धाया इत्यस्यनतथाप्रयोजनमित्याभाति २४ स्मेरं किंचिद्धास्यवत् सर्वविशेषाविर्भावादिति

फणाशतपीतस्थासोरागान्धायाःश्रियःकेलिः २४ स्मेराननेनहरिणासस्पृहमाकारवे
दिनाकलितम् जयतिपुरुषायितायाः कमलायाःकैटभीध्यानम् २५॥

भावः यदाननं अर्धालस्यास्मेरनकृत्वा आकारवेदिनास्मेराननेनरूपज्ञापकज्ञानवताहरिणाअ
कलितमऽनुमितं स्मेराननेनेतिहरिणोत्यस्यापिविशेषणं विपरीतरतकारिण्याः श्रियःसस्पृहं
एवंचस्वस्यातिसुंदरत्वेपितद्विषयकस्पृहावत्त्वेनाऽनिर्वचनीयरूपशालित्वंकैटभ्याव्यज्यते
कैटभीध्यानं एवंचस्त्रियापिहीध्यानेनाऽद्भुतत्वंकैटभीरूपेद्योत्यते जयतित्रिभुवनाभि
रामयापिक्रियमाणत्वादितिभावः २५ ८

कृतं कांतं मनोज्ञं यत्केलिकुतुकं एवं चोन्नाहविशेषेणाहरतं संपादनात् स्वामस्वाकुल्यं व्यज्यते
यत्तत्कांतेन विस्तृतनामसहयत्केलिकुतुकमिति तत्र अन्येन महाप्रसक्तेः कांतेकेलिरित्यनेन
स्मरतत्क्रीडैवायातीत्यपिन अन्यक्रीडादेः संभवात् नाभिसरोजे इत्यादिनैव तत्स्यतीतेश्व
यथा एतादृशीयाश्रीः तस्याः शीतामरनानलसंतापनिवृत्तेरितिभावः येस्वामताः तेषामेके
न निद्राणाः सकलसद्वद्वीयत्वेन स्वामेवाधाद्वारंवारंसंबंधयोल्लत्यते तेन च स्मृत्वनिद्रायो

कृतकांतकेलिकुतुकश्रीशीतस्वामनिद्राणाः योरितविततनालिरुतोनाभिसरोजवि
धिर्जयति २६ एकरदद्वैमातुरनिस्त्रिगुणा चतुर्भुजापि पंचकर जयषण्मुखनतसम
छदगंधिमदाष्टमतनुतनय २७॥

गयात्वव्यज्यते विततनालिरुतमेवं चोरितं यस्य नाभिसरो
जे विधिर्जगन्निर्माणकर्ता एवं च अभवत्नाविद्गयोगयत्वं व्यज्यते जयति सरोजमायतनपी
तमंदसुगंधसमीरणासुवास्वापयत्वादितिभावः २६ एकरदेति द्वैमातुर पार्वतीगंगारूप
मातृद्वयवत्वात् निस्त्रिगुण एवं च ब्रह्मरूपत्वं द्योत्यते चतुर्भुजापि पंचकराऽपि विरोधाभा
सार्थक श्रृंगमादायपंचकरत्वं अन्यथा चतुर्भुजत्वं ष[illegible]वनत ज्येष्ठत्वादितिभावः

गी॰ समरहृदंगयोर्मदीयस्य अप्रहतनुर्महादेवः ततनय एतादृशास्त्वजय संख्योऽकममा
टी॰ नमत्र २७ मंगलकलशद्वयरूपो कुंभौ यस्य तं एवं च विघ्नविनाशनदक्षमतं व्यज्यते गज
९ वदनं यदंभेन एवं च दंभेन भजत मनर्थकामिनोवद्यते यदीयदानोदकार्थं चंचलैः सौ
रभ्यशालिताद्दानोदकस्येति भावः तरलपदेन मकलकुसुमगंधाधिकत्वं दानगंधे व्यज्यते
दानतरलैरिमेव साधुः मदोदानमित्यमरः लोचनेन तोयपदानर्थकात् रोलंबैर्भ्रमरैः

मंगलकलशद्वितयकुंभमसंदंभेन भजत गजवदनम् यद्दानतोयतरलैरलिकुल
नालम्बि रोलम्बैः २८ याभिरनंगः सांगीकृताः स्त्रियोऽस्त्रीकृतास्त्रातायेन वामाच
तिलसाम्य रूपामन्वादिति भावः एवं च कुंभयोर्महत्त्व रणप्रवणे प्रणमत तो कामिनीकामौ ॥
रं तं व्यज्यते अलंवि गणपतिविषयकोतिप्रभावध्वनिः २८ याभिः स्त्रीभिरनंगो मदनः
सांगीकृतः स्वयं तत्साहाय्यसंपादनादिति भावः येन मदनेन ताः स्त्रियोऽस्त्रीकृताः स्वविजय
साधनेन नेतिभावः इति वामस्पर्शं दर्शस्य समीचीनयस्येति यावत् यदा च रणसमीचीनता च र
णामित्यर्थः तत्र प्रवणे तत्परौ एवं चांगहीनस्यसांगता ॥

संपादनादेवमेवस्त्रीत्वेननायकाधीनानांस्त्रीणांस्वात्त्र्यपतासंपादनेननायकस्यतदधीन
त्वसंपादनानुपकारप्रकरणानुभयोर्ज्ञापेत अतएवनारदकामिनीकामौप्रणामत एवंचै
तत्त्वेवयासमीचीनमेवभविष्यतीतिध्वन्यते एतच्चशृंगाररहितस्यागवतासंपादनास्त्रीणांच
स्त्रीभिन्नत्वसंपादनाद्धिरुद्धाचरणस्वाभाव्यात्कामिनीकामौप्रणमत एवंचैतयोःसंगतिः
सतानोचितेतिध्वन्यत इतिबोध्यम् तत्संगलप्रकरणाविरोधात्स्त्रीपुंवामानन्वयाच्चास
मंजसमिवाभाति यद्वापरस्परमप्येतयोरीदृशीविपरीताचरणप्रवणत्वेनाऽन्यस्यतत्करण

विहितघनालंकारं विचित्रवर्णावलीमयस्फुरणम् शक्रायुधमिववक्रं वल्मीकभ
वंकविंनौमि २॥

स्यानिष्ठगमत्वादेतत्स्येवैवसमुचितेतिध्वन्यत इत्यर्थः २ अथक
वीन्नौति शक्रायुधमिव विहिताघनावहेवाऽलंकाराउपमादयोयेनतत्पदे विहितमेघालंकर
णं विचित्राणांवर्णानामक्षराणांयाश्रावलीतन्मयंचस्फुरणंस्फूर्तिर्यस्यतत् पक्षे वर्णानीलपी
तादयस्तत्पंक्तिविकारःस्फुरणमुत्पत्तिर्यस्यतत्वक्रं वक्रोक्तिकुशलं पक्षेयथाश्रुतं वल्मीक
भुवंवाल्मीकिं शक्रधनुर्बोधितनपक्षेवाल्मीकिरितिलौकिकं कविंकाव्यकर्तारंनौमि स्तुपक

गी॰ व्यासवचसांनिर्यासं एवंचतत्वार्थवत्वंसारत्वंचव्यज्यते विश्वस्यजगतःसारं एवंचइतोत्यन्तपु
टी॰ रुषार्थसाधनमितिध्वन्यते एतादृशंभारतंवंदे यदंकितांभारतचिह्नितांसंज्ञांभूषणतयैव
भारतीवहतिएवञ्चभारत्याभूषणत्वेनतन्नामप्रसिद्धनामएवंप्रतिपादनेनसर्वग्रन्थाधिकत
१० मोव्यज्यतेभारते एवकारेणास्वाभाविकत्वमुदासः अन्योप्यप्रसिद्धः प्रसिद्धस्यैकस्यचिह्नात्मा
प्रसिद्धोभवतीतिलौकिकम् भारतकर्तृत्वेनव्यासस्तुतिरप्येवधेयम् २१ काकुत्स्थान्वकुलतडु

व्यासगिरांनिर्यासंसारंविश्वस्यभारतंवंदे भूषणतयैवसंज्ञांयदंकितांभारतीवहति
२१ सतिकाकुत्स्थकुलोन्नतिकारिणिरामायणेकिमन्यदपिकाव्यं रोहतिकुल्यागंगा
पूरेकिंबहुरसेवहति २२॥

न्नतिकारिणी कुलपदेनसर्वेषामप्युन्नतिसंपादनेनशान्तकोटिषु
विस्तरत्वेनेनचबहुतरप्रमेयत्वंव्यज्यते बहुरसेप्रभूतशृंगारादिरससंपालिनि पक्षेबहुजलवति
एवंचतापनोदकत्वंव्यज्यतेअतएवतादृशरामायणेसति अन्यत्काव्यंकिंरोहति चित्तपथमिति
भावःतेनगतार्थत्वादितिभावः अत्रदृष्टान्तमाह गंगापूरेवहतिसतिकुल्यास्वल्पकाव्यमात्रसरित्किं
रोहतीतिकाह्वपनेत्यर्थः नचित्तपथमवतरतीतिभावः २२॥ ११

अत्यंतदीर्घजीवदोषात् जीवनं जीवः चिरंजीवित्वरूपदोषादिति भावः अतिचिरजीवित्वस्या
न्यत्र गुणत्वेप्यत्रैव दोषत्वमिति भावः दोषपदं परिहरणीयत्वं व्यंजयति रामेण यशोहृतं न खेदेः
पहारितं यशः पदं मरणं न मरणीयत्वं व्यंजयति अत एव खेदोचितः एतदेवाह सपवज्जन्म
प जन्मांतरमापन्नो गुणाढ्यो बृहत्कथायाः कर्ता केनोच्यतामपितु सर्वैरिति भावः एवं गुणाढ्य व्यव
हारे रामस्य चिरजीवित्वमेव प्रतिबंधकं संवृत्तमिति भावः एवं चैतादृग्यशोभिः स्पृहा न कृ
ता किंतु चिरजीवित्वमिति महन्मूर्खत्वमावेद्यते रामे तेन च रामाधिकत्वं गुणाढ्ये ॥ २३ ॥ वल्मी

अतिदीर्घजीवदोषाद्रामेण यशः प्रहारितं हंत केनोच्यते गुणाढ्यः सपवजन्मांतराप
न्नः ॥ २३ ॥ श्रीरामायणभारतबृहत्कथानां कवीन्नमस्कुर्मः त्रिस्रोता इव सरसा सरस्वती स्फुर
ति यैर्भिन्ना ॥ २४ ॥

किंनामगुणान्वान्कवीन्नमस्कुर्मः यैर्वाल्मीकादिभिर्भिन्ना विलक्षणा रीत्या
नुसरणादिति भावः सरसा शृंगारादिमती पक्षे सजला सरस्वती वाणी नदी च त्रिस्रोता इव गंगे
व स्वर्गमर्त्यपातालेषु प्रवाहत्रयवता गंगायाः एवं च वाल्मीकादिवाचां सकलकल्मषविना
शकत्वपोत्पते स्फुरति एवं चेत्रितयवाचां वास्तवैकत्वरूपकत्वमिति व्यज्यते तेन च वाल्मीका
दित्रितयस्य समानत्वमावेद्यते यद्वा वाल्मीकस्यैव तया किंचिन्न्यूनत्वं व्यासेन तेन गुणाढ्य इति ध्वन्य

ते पूर्ववच्छ्रीपदं त्रिष्वप्यस्त्वेति अत्र नतु रामायणमात्रे ॥ २४ ॥

गी॰ साकूतं साभिप्रायं मधुरं रसोत्कर्षाधायकं रसनिष्ठगुणाव[illegible]कोमलं सानुगुणपालि
टी॰ एतादृशाभिप्रायविलाससशालिन्याः कंठकूजितं तत्प्राये प्रायशब्दः क्रमेणाबाहुल्यसादृश्योपस्थाप
कः ॥ इति लीलाकालिदासोक्तौ शिक्षा ॥ समयेपि मुदे एवं चोभयोः समत्वमिति भावः एवं च
११ सर्ववचनस्याप्युपदेशसमये बहुधा दुःखदत्वेन रतिलीलाकालिदासोक्त्याः सुखप्रदत्वेन स
र्ववाग्विलासाधिक्यं व्यज्यते ३५ भवभूतेः शिवैश्वर्यस्य संबंधाद्भारत्येव भूधरभूर्न गंगैककन्या
भाति एवं चाणिमाद्यैश्वर्यालिंगितेच्छानभिघातरूपप्राकाम्याद्भारत्या न गंगैककन्यारूपत्वं तथाभ

साकूतमधुरकोमलविलासिनीकंठकूजितप्राये शिक्षासमयेपि मुदे रतिलीलाका
लिदासोक्तौ ३५ भवभूतेः संबन्धाद्भूधरभूरेव भारती भाति ॥

वभूतेः कवेः एवं च ईशैश्वर्याभेदेवाध्येनेन स्वेच्छानुरूपकार्यकारित्वं व्यज्यते संबंधात् भारत्येव भू
धरभूः पर्वतभूमिः एवं च नान्यथा शंकनीयमिति भावः भाति अन्यथापतनात्कृतनकरणारसप्र
धाने अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयमित्युत्तररचरितीयपद्ये ग्रावा शैलः ग्रावा
णौ शैलपाषाणावित्यमरः किमिति रोदितीति यद्वा भवभूतेः संबंधादित्यस्य भवैश्वर्याविनाभा
वादित्यर्थः भूधरभूः शैलतनया भारती भाति सरस्वतीरूपेणादृश्यत इत्यर्थः ॥

एवं च यत्र ईशैश्वर्यं तत्र शैलत्वं तन्न यावत्पर्यवस्येयमिति नियमादीशैश्वर्यवति कवौ शैलत्वं तामसत्व
नीरूपेणास्थितमिति भावः एवं चैतत् ॥ वेदद्विरणानां स्तूपानां मकरन्दबाजपेन यत एवं भवस्य शंभोर्भूति
रैश्वर्यं यस्मिन्निति नाम्निश्रुतत्वात्तिरपि संगच्छते अथवा कवौ भवभूत्यभेदबोधनेन पार्वती सम्बन्धमा
वप्रपञ्चं विपक्षे तर्कमाह अन्यथा एतत्कृतकारुण्य एव एवं चान्यैः वृद्धिभिः करुणास्य प्रधान
काष्ठानि विहितानि पर्यन्तं तत्र शैलरोदनमिति भावः ग्रावा किमिति रोदिति एवं चैतत्कृत
कारुण्ये जामातृसंबंधेन शैलस्यापि रोदनमिति भावः अथवा भवभूतेः शिवैश्वर्यस्य संबंधात्

एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा ३६

तत्कृपातत्वर्थः भारतीभूधरभूरेव भूधरइति कविनाम भवभूतिरिति तु गिरिजायाः कुचौ
वंदे भवभूतिसितानना इति पद्यकरणानंतरं पदवीनाम तस्मात् इव तेन ताद्दशेव ज्ञाता एवं च सर
स्वती प्रवाहस्तेन एव तस्य कविर्वति रेकोध्वत्यते न त्वेतत्कैवभूधरत्वे किं प्रमाणमत आह अन्यथा ॥
एतत्कवेर्भूधरत्वाभावे एतत्कृतकारुण्ये ग्रावा पाषाणः कथं रोदिति एवं चैतत्कारुण्ये भरका
लीनपाषाणरोदनस्यैतत्संबंधाभावेनैवानुपपत्त्या कवौ भूधरत्वसिद्धिः एवं च जन्यजनकभा
वसंबंधाद्रोदनेयुक्तेनैव एवकारइवार्थकइति केचित् ३६ ॥

गी॰ प्राक्पूर्वं यथा शिखंडिनी द्रुपदपुत्री शिखंडी द्रुपदपुत्ररूपा बभूव तथा वाणी सरस्वती अधिकभाग
टी॰ लभ्यप्राप्त्यर्थं वाणः कादंबरीकर्तृरूपा बभूव पवर्गान्तीयांतस्थवकारयोरिति भावः एवं च
१२ सरस्वतीतोऽधिकत्वं वाणेद्योत्यते वस्तुतस्तु बवयोरैक्याद्दोषाद्भेद एव ३७ यं प्रभाकरात् एवं
च प्राभाकरं तंत्रनिपुणान्ततातस्यावेद्यते एते बृहस्पतेः अनुपश्चाद्गणयंति यस्य स्मृतेनाश
पेदन सूर्यमंडलमात्रियेनाःदर्शने धर्मकर्मसंकुचितं तातस्य शास्यमान्यस्य धर्मकर्मप्रवर्तक

जाता शिखंडिनी प्राग्यथा शिखंडी तथावगच्छामि प्रागल्भ्यमधिकमाप्तुं वाणी का
दंबरीकारः ३७ यं गणयन्ति गुरोरनु यस्यास्तु धर्मकर्मसंकुचितम् कविमहमुशनसमि
व तं तातं नीलांबरं वंदे ३८ सकलकलाः कल्पयितुं प्रभुः प्रबंधस्य कुमुदबंधोश्च सेनकु
लतिलकभूपतिरेको राकाप्रदोषश्च ३९॥

स्याभावादिति भावः एतेमलमासेष्वशुक्रास्तेपि
केषांचित्कर्मणां निषेधादिति भावः यद्वा यस्य तातस्य धर्मकर्म एवं चाधर्मकर्मणोऽभावो व्यज्यते
संकुचितं सम्यक् कोऽपि शिथिलं चितं वा स्मास्ते एवं च कर्मठत्वेन सर्वत्र तातस्य प्रसिद्धिरिति भावः
यद्वा यस्याः धर्मकर्मविषये संकुचितं संकोचो भीतिरितियावत् शास्ते कविं काव्यकर्तारं एतेन
त्रामानमुशनसमिव शुक्रमिव तं प्रसिद्धं तातं नीलांबरं संकर्षणाभिधं आत्मनामगुरोर्नामेत्यादि १२

निषेधात्प्रकारांतरेणाभिधानं वंदे ३७॥

प्रबंधस्य चतुःषष्टिकलाः कुमुदबंधोश्च इयमेव षोडशकलाः कल्पयित्वं वक्तुं कर्तव्या एते दर्शि-
यितं सेन कुलतिलकभूपतिः सेतुकर्ता प्रवरसेन नामा राजा यो राज्ञां मासीत् प्रदेशषष्ठ एकः प्रभुः समर्थः
नाम्य इत्यर्थः ३९ अदेवराणां वर्णानां मैत्री एकवर्गपठितत्वादि रूपा एकस्थानकत्वे सति एक-
प्रयत्नकत्वरूपा वा भजति तस्य एवं च संबंधविशेषशालित्वं व्यज्यते पुरुषविशेषणानां अर्था-
दक्षरमैत्रीभाज इति काव्यस्य योजना विशेषवत्त्वं ह्याशीर्भयस्य ग्रथवाधाय कर्कशाः अ-
काव्यस्यादक्षरमैत्रीभाजो न तु कर्कशा न च ग्राम्याः प्राज्ञा अपि पुरुषा अपि साधव एवा
धेवाधाय ४० वर्णेनगुणाः इव न विशान्ति रसभावितेसमतामनसि रसमपि वनप्रतीकृतिबहु
तिकटवः तेषां रसापकर्षकत्वादिति भावः एते कूरमतयः प दोषः सन्निपातीव ४१ ॥
वेच परोक्तिखेद न मात्र निपुणत्वं व्यज्यते नच ग्राम्यचिद्गम्यप्रयुक्ताः एवं च चारुत्वाभावो व्यज्यते नच
एते ग्रामपात्रवासिनः एवं च काव्यवासनावासितांतःकरणत्वाभावो व्यज्यते प्राज्ञा अपि पुरुषा
अपि किं न साधव एव व्याकरणामिद्राएव अस्माघुत्वज्ञानस्यार्थबोधप्रतिबंधकत्वात् एते निर्मल-
मतय एव एवं चार्थप्रतिबिंबभवनयोग्यत्वं द्योत्यते यद्वा काव्यार्थवासनाशालिन इत्यर्थः एवं चा

मेषांकाव्यवोपानर्हत्वमितिवः ध॰ ॥

गी॰ वंशो वेणौ गुणाद्ध्व कीटइव रसभाविते शृंगारादिभावनावति एतेजल्लातिशाय संबंधवति
टी॰ औषधीइव लेपवतीति कश्चित् सतां मत्सररहितानां सहृदयानां वा मनानामनसि मनस्वीत्येक
वचनेन समीचीनमनसामेव व्यसनशालितं ध्वन्यते दोषो न विशति एवं च मतेन रामवस्यत
१२ भावो ध्यायते बहुदोषोष्येक इव एतेन रोदाहः तल्लोशीत्वमस्थिसंधिरुज इत्यादि वहूपद्रवा
13 वान् सन्निपातीव पुरा एतत्प्रकुपितवातपित्तादिमान् रसमपि शृंगारादिकमपि एवं च वा

विगुणोपि काव्यबंधः साधूनामाननं गतः स्वदेन फूत्कारोपि हि वंशोमनुष्यमा
नः श्रुतिं हरति ५२ ॥

तीकाङ्क्षादेरितिभावः न प्रतीक्षते न गृह्णातीति किं वक्तव्यमितिभावः ५२ विगुणोपि ये येकाव्यगु
णाश्चादत्तमश्रूर्योपि काव्यबंधः शब्दार्थौ भयरचे च नार्थः एवं चात्र बंधपदमधिमाभातीति निर
स्तं साधूनां एवं च गुणवत्ता संपादकं कर्तृत्वध्वन्यते स्वदेत सुखसंपादको भवति स्ववंशः सरलत्वगुणैः
अनुश्राम्यमानः एवं चानुनादं संपादनेपि हि जनदुर्जनयोरंतरं भवतीतिभावः फूत्कारोपि एवं च स्वल्प
जनकत्वं ध्वन्यते श्रुतिं हरति श्रवणसुखसंपादको भवति यद्वा स्वगीयार्थप्रतिपादकत्वदर्शिवय

[illegible]

१२

स्वयंभूरिच्छिद्रोपि बहुवाचो एवंच सदोषेषु दर्शनयोग्यतेपि तद्दर्शनाभावेन भ्रांतत्वमाषद्यते
एतेन बहुच्छिद्रोपि सर्वतोमुखं सर्वतोमुखं सर्वजनसमक्षं एतेन सर्वदिग्विषयं चापलं मौखर्यं एवं
चजनभीतिशून्यत्वं ध्वन्यते एतेन चापलं तन्वन् विस्तारयन् एवंच विरत्वभावो ध्वन्यते तितउः
तितउर्नो चालनी स्त्रियामित्यभिधानं पिशुनः परोत्कर्षासहिष्णुः विवेचने निर्णये एतेन स्वी
कारे अधिकृतः दत्ताधिकारः एवंच गुणादिकं विहाय दोषमेवांगीकर्त्तत्वं तितउ श्चासमिति भावः॥ ४३

स्वयमपि भूरिच्छिद्रश्चापलमपि सर्वतोमुखं तन्वन्। तितउस्तव सप्ति पिशुनो दोषस्य
विवेचनाधिकृतः ४३ अन्तर्गूढानर्थानव्यंजयतः प्रसादरहितस्य संदर्भस्य नदस्य
च न रमसः प्रीत्यै रसज्ञानाम् ४४॥

अंभसि नदे गूढं स्थितान् एतेन निलीनान् अर्थान् प्रतिपाद्यविषयान् एतेन पदार्थान् अव्यंजयतः
व्यंजनाविषयान कुर्वतः एतेन अप्रकाशयतः अत एव प्रसादेन काव्यगुणेन एतेन निर्मलतया
रहितस्य संदर्भस्य काव्यस्य नदस्य च पुंस्त्वनिर्देशेन निर्मलत्वस्यावश्यापेक्षणीयत्वमित्यावे
द्यते नउक्तम् हिंसापवकवयः हिंसाएपेव काव्यानीति रसः शृंगारादिः एतेजलं एवंचा
न्येषामप्रीतिजनकत्वेपि न काचित् क्षतिरिति भावः रसज्ञानां प्रीत्यै म ४४॥

गी॰
टी॰
५४ 14

यत्तु अमृतात् हृदयभिन्नानां पद्येऽपापवतां असेवनीयं अमृतवत्स्वं पद्येऽमृतबहुले सु
वर्णानां शोभनाक्षराणां विन्यासो ग्रथनं यत्र वर्णान्वादाक्षरदमरः पद्ये सुवर्णा स्पृहेन्वा
विन्यासो रचनादि यत्र शोभनरसार्थोभयप्रचुरं पद्ये देवमस्पृहवहुलकाव्यं त्रिविषयं
स्वर्गं वा समं विद्मः एवं चात्र नान्यथाभावश्चाशङ्कनीय इति भावः एवं च यथा स्वर्गार्थं
यत्नः सद्भिः क्रियते तथा काव्यार्थं विधेय इति व्यज्यते ५५ सत्कवेः एवं चासत्कवेर्निरासः
रसेनैव शूर्पी अल्पश्रूर्पशूर्पी प्रस्फोटनं शूर्पमस्त्रीणां निस्तुषतां जायते न तथा महाशूर्प

यदसेवनीयममृतामृतप्रायं सुवर्णविन्यासं सुरसार्थमयं काव्यं त्रिविष्टपं वा
समं विद्मः ५५ सत्कविरसनाशूर्पीनिस्तुषतरशालिपाकेन त्वेष्टाद्दयि
ताधरमपि नाद्रियते कामधा दासी ५६॥

रीति स्त्रीसंप्रदा तया निस्तुषतरो निर्दोषः शाल्युपायः शालिसत्पाकेन परिणततिदोषेका
कोऽप्याह्लादेन त्वर्थः त्वेष्टाद्दयिताया एवं चाऽनिस्पृहनीयत्वमपरेऽप्यन्येन अधरमपि अपिरु
त्कृष्टत्वं व्यंजयति नाद्रियते कामधादासी एवं च माध्वीकादेः कुत्र गणनेति भावः एवं च सुधा
ताऽधरेतनोपि सत्काव्याधिकत्वं ध्वन्यते एवं च स्वर्गार्थं यत्नं विहाय काव्यार्थमेव सं विधेय इति ५४

ध्वन्यते अत्र च शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावलीति इदं द्विमेने तार्थे विशेषविशिष्टस्यैव
काव्यत्वमिति प्रदीपकृन्मतेन च शब्दमात्रोपादानम् ४८ न कलिता शब्दस्यालंकृतिर्यया
अनुप्रासादिशब्दालंकृतिशून्येत्यर्थः एवं चार्थालंकारादिमत्त्वं व्यज्यते एवं अकलितः श
ब्दाययापतादृशी अलंकृतिर्भूषणं यस्याः सशब्दभूषणावेत्वेऽन्यस्यज्ञानं भविष्यतीति धि
येति भावः अनुकूल्याद्भुतेरप्रत्यायिकापदेन नायकचित्तानुकूल्यवती स्खलितः बंध
दार्ढ्यशून्यः कोमलत्वमिति यावत् पदानां सुप्तिङन्तानामवतो निवेशो ग्रथनं यस्याः सा एवं

अकलितशब्दालंकृतिरनुकूलास्खलितपदनिवेशापि

वेगोद्दीरीति युक्तेति ध्वन्यते एवं स्खलितं स्थानात् अन्यत्र पतनं एवं च संकेतगमनस
त्वरत्वभावद्योतने पदनिवेशः अक्षरविन्यासः यद्वा अनुकूलानि स्फुटमर्थप्रतीतिजन
कानि अस्खलितानि व्याकरणानिष्पन्नानि एवं च नेयार्थासाधुत्वदोषशून्यत्वं द्योत्यते
यानि पदानि तत्सन्निवेशवती एवं अनुकूल्यानि इङ्गितसंकेतप्रापकाणि स्खलनहीनानि
यानि पदानि तद्विन्यासवती अपिरताभ्यायां एवं च गुणादोषाभावायोः

संपादनेनात्यन्तमाग्रह इति भावः सोत्कर्षशृंगारा उत्कर्षशालिशृंगाररसवती पद्येऽत्र
हृमस्यायमेमेति परिपोषवती अभिसारिकेव अभिसरणाभिसारणान्यतमवतीव उ
क्तं च यात्वात्माभिसरेत्कांतं सारयेद्वाभिसारिकेति एवं च प्रमातिशयो व्यज्यते सूक्तिः का
व्यं पद्ये शोभनोक्तिमती रमयति एवं च काव्यं शब्दालंकृतिदोषाभावरसवत्त्वसंपादनप्रयोज
कं अपि तूत्कृष्टशृंगारवत्तासंपादनमेवोचितमिति व्यज्यते यद्वा शब्दालंकृतिशून्यास
दोषपदविन्यासापि सोत्कर्षशृंगारा सूक्तिः रमयति शब्दस्य प्राधान्यात्तदलंकारवत्तस्या

अभिसारिकेव रमयति सूक्तिः सोत्कर्षशृंगारा ४७

वश्यकत्वेपि तदभावे दोषराहित्यस्यावश्यकत्वेपि तदभावेपि केवलोत्कृष्टशृंगारवत्त्वेनैव
चमत्कारातिशयजनकत्वं काव्यस्येति भावः एवं च शृंगारादिरसवत्त्वं काव्यैः वश्यमपेक्षित
मिति व्यज्यते अत एव नीरसो हि निबंधो यः सोपशब्दो महाकवेः स तेनाऽकविरेव स्यादन्ये
नाऽस्मृतलक्षण इति ध्वनिकृता रसस्य प्राधान्यमःभ्यधायि एवं च सर्वरसप्रधानीभूतशृं
गारवत्त्वमःस्यैतोत्कृष्टमिति तात्पर्यार्थः ४७ ।।

अस्य ध्वनिव्यंग्यार्थशून्यं यत्र ध्वनिरूपत्वमकाव्यं तद्भिन्नमित्यर्थः इति तत्र गुणीभूतव्यंग्यादेरपि
हृदयाह्लादजनकत्वात् पदैः तु शिशुतत्त्वशून्यम् पदग्रहरूपं अन्यप्रासमात्रार्थं पदग्रहः परमु
त्कृष्टो यत्र पदैः स्थितं चरणानां मलङ्कारः काव्यं अभिज्ञसभायां एवं चाऽनभिज्ञसभायां हृदयाह्ला
दजनकत्वेऽपि न किंचित्फलमिति हृदयं वा न मदयति श्रवणं वा न मदयति एवं च श्रो
तुर्हृदयान्तरदध्यानेन विषयान्तरस्फूर्जितशून्यं न करोतीति भावः अत्र हृदयं श्रवणं
वा न मदयतीत्येतावतैव सिद्धे द्वितीयनवत्वमनन्यप्रयोजनमाभाति श्रवणं श्रोतुः

अप्राप्तिपदग्रहरूपं मदयति हृदयं न वा न वा श्रवणं काव्यमहो भिन्नसभा
यां मंजीरं केलिवेलायाम् ॥ ४८

हृदयं वक्तुर्न मदयति अपरिज्ञानादिदोषान्ताप्य मन्यप्रयोगाविज्ञानमित्याशुक्तेरिति
व्याख्याने नवाकारद्वयं न ज्ञोनानर्थकमाभाति मंजीरं क्रीडाकाले न मदनाविर्भाववर्तकरो
तीत्यर्थः काव्यं हृदयं न मदयति मंजीरं श्रवणं न मदयतीति व्याख्यायां वाकारद्वयमनर्थक
माभाति अत्रेदमवधेयं व्यंग्यार्थशून्यं काव्यमेव नास्ति न चाव्यंग्यपत्त्वपरमस्तमित्यत्राव्यं
ग्यात्त्वमाभावव्याप्यपि काव्यत्वमस्तीति वाच्यम् तदुदाहरणस्वच्छन्देत्यादि पद्ये मंदाकिनी

गी॰ विषयकरत्वाख्यभावादिव्यंग्यस्यसमता। किंबहुना सकोपिविषयोनास्तियत्रव्यंग्यंन
टी॰ भासतेसमयादेर्विशेषस्यह्यभानेहेतुतामता अतएव प्रधानगुणभावाभ्यांव्यंग्यस्ये
वंव्यवस्थिते उभेकाव्येततोन्यद्यच्चित्रमभिधीयत इति ध्वनिकृताभ्यधायि यद्वाकाव्यं
१६ काव्यत्वाभिमतं ४८ आस्वादितः नतुपीतः एवंचाधरयोनिःस्यंताधररूपोनवाकोट्टः
16 माधुर्यमुत्पन्नमनेनइतिनविद्मइतिभावः दयिताधररूपस्तथाकारसोयेनतस्येव एवं
चनास्यास्तीतिभावः यद्वामधुरएवेतियोज्यं एवंचाऽमधुरांशाव्यवच्छेदः यद्वाआस्वादितो

आस्वादितदयिताधरसुधारसस्येवसूक्तयोमधुराः अकलिततरलमुकुलोकि
लः कलमुदंचयति ४९

दयिताधरसुधारसोयेनतस्येव एवंचस्वदेहेनदयिताधरपानेविधायपश्चादेवरूप
णामृतंनिपीयेनउभयाधिकतररसवत्काव्यकृतयाकविर्भवतीतिभावः एवंचदयिता
धरास्वादादेर्हेतुत्वप्रतिपादनात्सर्वासकार्यस्यकारणेनादररवत्काव्यास्वादवतःसकल
विषयास्वादमौलिभूतदयिताधररसास्वादावनादरइतिद्योत्यते एवंचकाव्यास्वादेब्रह्म
रसरूपताद्योत्यते सूक्तयःकाव्यानिमधुराः एवंचदयिताधरसुधारसयोरधिकतररसस्यका १६

यस्मामोऽन्यभिधानेन तद्विशेषोत्तमकाव्येऽन्यताविषयस्तेनाव्यवधेन अत्र दृष्टांतमाह अनास्वादि
तच्चूतमुकुलः सकुलमपि न रससंभृतत्वं व्रजेत कोकिलः कलमधुरं न वदतीति यद्वा सहृदयउत्त
मकाव्यानि ४९ लोकव्यवहारज्ञानस्य काव्यहेतुत्वमित्याह बालायाः कटाक्षेण सूत्रितं सू
चितमित्यर्थः एवं च लज्जावतैव प्राकट्यसंपादनायोग्यत्वं अत्र बालापदेनाल्पवयस्काभिधी
येन न स्वीयाभेदः स्वपाश्च सतीत्यर्थविरोधात् सामान्य सतीत्वपि नायिकायाः स्वीयात्वादिति
त्यपि कश्चित् असत्यानेत्रत्रिभागेन बलेनेत्र व्यापारेणाकृतमाख्यम् कृता किंचित्याकटं हृतीव्या

बालाकटाक्षसूत्रितमसतीनेत्रत्रिभागकृतभाष्यम्

ख्यातं दूतीवचनं दृष्ट्वाभिहितं भावमभिप्रायं कविमाणवकाः कवयो माणवका इव एवं चाप्त
त्वद्योत्यते अधीयते एवं चातीतमतिभिः सूत्रणा ततोऽल्पमतिभिर्भाष्येणातितोऽप्यल्पमतिभि
र्व्याख्यानेन यथावद्बुध्यते ग्रंथादि तथात्रातीतमतिभिः कैश्चित्कविभिः स्वल्पव्यवहारज्ञानेन
ततोऽप्यल्पमतिभिरधिकतरज्ञानेन काव्यं क्रियत इति व्यवहारज्ञानं कुत्रापि व्यभिचरतीति
ध्वन्यते यद्वा प्रेमयहरणशीलान् कवीन् निंदति दूतीव्याख्यातमित्यनेनैतत्समासपदादयम

र्थो वाच्य इति नियमसहायशक्तिविषयमिति व्यज्यते शक्तेरतिस्थूलमतिविषयत्वात् असतीने
त्रत्रिभागकृतभाष्यमित्यनेन जघन्यलक्षणावृत्तिविषयमिति द्योत्यते लक्षणावृत्तेः किंचित्स्थू
लमतिविषयत्वात् बालाकटाक्षसूचितमित्यनेन व्यंजनावृत्तिविषयमिति व्यज्यते व्यंजनावृत्तेर
तिसूक्ष्ममतिविषयत्वात् भावमर्थं अर्थात् व्यंग्यकाविनिबद्धं ये अधीयते स्वकाव्यविषयीकुर्वंति
तेन कवयः किंतु नैव बालका मूर्खा इत्यर्थः एवं च परकाव्यस्पृहवाच्यलक्ष्यव्यंग्यार्थास्पर्शित्वं स्व

कविमाणवका इतीमां लोतनमऽधीयते भाव्यम् ५॥

काव्यस्य व्यज्यते यद्वा बालाकटाक्षसूचनादिव्यापारप्रकटार्थस्य कविमाणवककाव्यविषयत्वं क
वीनां त्वत्यंतनिगूढार्थात्मिकाव्यविषय इति स्वग्रंथे निगूढार्थविषयत्वं व्यज्यते अथवा कवयः सर्वे
बालका इव एवं च बालाकटाक्षसूचितमित्यादिना नायिकाभिः स्वकृत्या प्रकटीकृतभावस्याभिज्ञ
त्वं कवीनां न तु तदंतर्गताभिप्रायज्ञत्वमिति नायिकाधिकवर्णनेन तद्विषयं शृंगारवर्णनापेक्ष
याकठिनतरमिति द्योत्यते तद्वत्त्वेन स्वग्रंथाधिक्यं च अतएव शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोव
र्द्धनस्पर्द्धी कोऽपि न विश्रुतः इत्यभाणि जयदेवेन ५॥

स्वकीर्त्यनुवृत्तयेपिस्वनामदर्शयन्नेवेनदार्यासृताः तद्वृत्यङ्गत्यर्थः पक्षेकोमलचरणविन्यासशा
लिगतयः मथरगतयइत्यर्थः सज्जनहृदयमःभिसरंति पक्षेचसहृदयहृदयसमधिगम्यार्थाइति
भावः पक्षेचसुहृदयानाभाजनंकुर्वंतिताः सुष्टरसः शृंगारादयोयासुताः पक्षेआसक्तिविशेषवत्यः
मदनाद्वैतोपनिषदः उपनिषद्इत्यनेनमदनोद्दीपकत्वातिशयशालित्वमावेद्यते पक्षेसन्नि
धिमदनसंतोषात्तस्मिन्नात्माकारितंध्वस्तेन विशदाः प्रसादप्रमुखगुणवत्यः पक्षेउज्वलवेषाः
आर्याछंदोनाम पक्षेश्रेष्ठाःगोवर्द्धनस्यगोवर्द्धनइतिकविनाम ५१ वाणीप्राकृतकाव्यसम्यगुचि

मसृणपदरीतिगतयः सज्जनहृदयाभिसारिकाः सुरसाः मदनाद्वैतोपनिषदोविशदा
गोवर्धनस्यार्याः ५१ ॥

तोरसोयस्याःएतादृश्येव बलेनबला त्कारेण पक्षेबलात्कारेण एवकारे
त्रैववान्वेति संस्कृतेनीता निम्नानुगामिस्वभावजला कालिंदीगगनतलमिव प्राकृतकाव्यस्य
सताःसंपादनेनसुगमतरम् संस्कृतकाव्योन्नतत्वेन्नतरमितिद्योत्यते तेनचस्वयंतत्संपादनेनस्वस्मि
न्नाधिक्यमावेद्यते यद्वावाण्याःस्वभावएवायंयत्प्राकृतकाव्यस्यरसनामाप्नोतीतिप्राकृतकाव्यक
रणादरएवसमुचितः तथापिसंस्कृतकाव्यपत्रादेवोमयाविहितः तत्रकदाचिद्यदि तथाविधस्व

रसताभावोभविष्यति॰ सचतत्रभवद्भिःदृंतंतद्यश्रुतिपथत्यते अथवा प्राकृतकाव्यसमुचित
रसावाणीप्राकृतसमुचितरसस्यैव प्राकृतानांनामाधारणजनानांसमुचितःस्तुत्वादित्यर्थः र
सोयस्याः अतःबलेनप्राकृतसप्तशत्यादिलिखकारेणसंस्कृतेनीता यद्वाप्राकृतेसाधारणज
नेसमप्यगुचितः अत्यंतइत्यर्थः रसःप्रीतिर्यस्याःपतनाद्रूपापिबलात्कारेणसंस्कृतेसाधुरूपंप्रा
पिता एवंचनीचाभिलाषिण्याःसत्कृतेनातसंपादनगुरुहर्षार्थइतिभावः निम्नानुरूपनीरासलि

वाणीप्राकृतसमुचितरसाबलेनैवसंस्कृतंनीता निम्नानुरूपनीराकलिंदकन्येवगगन
तलम् ५२ आर्यासप्तशतीयं प्रगल्भमनसामसंनादृतायेषां दूतीरहिताइवतेनकामि
नीमनसिनिविशन्ते ५३॥

लेत्यपिपाठः कालिंदपर्वतक न्यैव एवंचविवेकशून्यतंध्वन्यते
नचनीचानुगाभिरसश्शालिनायोगपतं गगनतलमसुच्चदेशंनीता एवंचप्राकृतसंस्कृतयो
भूतलगगनतुल्यताप्रतिपादनेनप्राकृतात्संस्कृतेस्यताधिकामावद्यते ५२ इयमार्याणांसप्तश
ती येषांप्रागल्भमनसांये:अप्रगल्भमनोभिरित्यर्थः एवंचाप्रगल्भमनोभिरादरेःनादरेवाकृते
नाकिंचित्फलमितिभावः दूतीरहिताइवतेनकामिनीमनसिनिशंते एवंचइतोयन्नकिंचिच्चातुर्य

रतरीतोत्सवीवं वसन्ते यस्मात् रसाविर्भावादितिभावः एवं चालंकारसंभ्रमादेः काव्योत्ततिभावः रीति
पदेनावश्यविधेयत्वं प्रियेव मुग्धापि स्वच्छन्दप्रासोपमाद्यलंकाररहितापि वाणी सन्तोषायेत्यत्र
त्र हेतुमाह सरसेति शृंगारादिमती एतेन शृंगारवतीरसप्रकृत्याश्चालंकृतापि युतापि एतेन कटक
कुंडलयुतापि शालभंजीव प्रतिमेव न रोचते एवं च रसस्याप्राणरूपत्वं व्यज्यते एवं च निरलंका
रस्यापि काव्यत्वमिति मिश्रत्वमिति मिश्रकृता चिन्तामशमेतेन अत एव नाभ्रूः मुनिर्जयति योगीन्द्रो
महात्मा कुंभसंभवः येनैकचुलके दृष्टौ दिव्यौ तौ मत्स्यकच्छपौ इति निरलंकारोदाहरणमध्यथा

स्वर्धामसमप्रशान्तीयं प्रगल्भमनसामः नारतायेषां हृदीसदा नाङ्गवनेन कामिनीमनसि नि
वसन्ते ५१ रतरीतिवीतवसनाप्रियेव शुद्धावाडमुखे सरसा अरसासालंकृतिरपि न रोच
यि वस्तुतस्तु एतद्ग्रंथोदाहृतपद्येष्वपि सर्वालंकारमौलिमणिरूपानिशायो \ नेशालभञ्जी ५४॥
क्तेर्विद्यमानत्वादुक्तिवैचित्र्यरूपालंकारविरहे काव्यत्वस्यासंभवात् काव्यं ग्राह्यमलंकारादित्यलं
कारस्य काव्यव्यवहारप्रयोजकत्वाभिधानाच्च रसवति काव्ये स्फुटालंकाररहितेपि न चमत्कार
हानिरिति रसस्य तस्याधिक्यप्रतिपादनमात्रे तात्पर्यम् अकलितेत्यादिपद्ये शृंगारोत्कर्षमात्रस्य प्रा
धान्यमर्थः अत्र तु रसमात्रस्य तदितिभावः ५५॥

गो॰ टी॰ १९ 19

धान्यमर्थः अत्रत्वरसमात्रस्यनदितिभेदः ५४ ॥ इतिश्रीमद्गोदावरीपरिसरालंकृतपुण्यपत्तनभूषि
तविराजमाननीलकंठपंडितात्मजबालापंडितात्मजतिमाजीपंडितांगजानंतपंडितकृतेगोवर्द्धन
सप्तशतीव्यंग्यार्थदीपनेग्रंथांभोचितनवज्याख्याख्यासमाप्तिमिता १ श्रीकामोजयति ॥ काश्चि
द्यौवनभराक्रांतांप्रपापालिकामालोच्यतांप्रत्याह अवधीति प्रपाजलदानस्थाने तद्दत्तणाक
र्ते एवंचधार्मिकत्वंव्यज्यते तेनपथिकजनजायानहंतव्याः इत्युपदेशदानयोगतं जीवनेर

प्रथमार्ति १ अवधिदिनावधिजीवाः प्रसीदजीवन्तुपथिकजनजायाः दुर्लभ्यावर्त्मशो
लौस्तनौपिधेहि प्रपापालि ५५

विनाशाकर्तृत्वमनुचितमितिव्यज्यते प्रसीद एवंचबलात्कारानर्हत्वंध्वन्यते किंप्रसन्नतायाः
फलमित्यतआह दुर्लभ्यौचतौवर्त्मशालौचएवंचमार्गांतराभावाद्दुर्लंघयितुमशक्यताच्चैतत्पिधा
नमावश्यकमिति द्योत्यते किंपिधानफलमतआह अवधिदिवसावधिजीवाजीवनंयासांताः
पथिकजनजायाजीवंतु एवंचकुचकनकमहीधरदर्शनलुब्धैः पथिकैरत्रैवकालातिवा
हनेकृतेऽवधिदिनातिक्रमेतत्कामिनीजनस्यमरणमेवभविष्यतीतिभावः एवंचातिशयि
तयौवनशालित्वंव्यज्यते ५५

कृतपरिणयांतरं नायकमसूयमानां नायिकां काचिदुपदिशति गृहिणी प्रथमस्त्रीसपत्नीप्रादुर्भा
वे सपदि एवंच किंचिद्विलक्षकोवेदः किं भविष्यतीति शालितं प्रत्येति अतिस्नेहवती समीचीन
स्वभावा सेवानिपुणा नायकमनोगतकारिणी नम्रा च जाता एवंच पूर्वं सपत्नीसंपादनदुः
खे नयाऽनूनस्नेहं सपत्नीतर्जनादिना दुःशीलतामिथ्येव तस्मै वा करिष्यतीति सेवां मोहं अतएव
मनः प्रातिकूल्यं किं करिष्यत्यत्ययमतः परं ममेत्यविनीततनामकरेण सपत्नीनाह्रणाद्रम
समः सम्यमेवायसस्यामंत्यनासक्तः स्यादिति भियाऽतिवात्सल्याय करोदिति भावः एवंच

अतिवत्सला सुशीला सेवाचतुरा मनोऽनुकूला च अजनि विनीता गृहिणी सपदि सप
त्नीत्वेनोढे ५८

तवाप्यग्रे एवमेव विधेयमऽस्मोऽ पुनासूयादिकरणमनर्थकमिति घात्यते
यद्वा नायिकाक्लेशशालिनं कंचन कश्चिद्विवाहांतरकरणमुपदिशति एवंच सपत्न्या जाता या
भियमऽवयपमऽत्यनानुकूल्यमाचरिष्यतीति ध्वन्यते काचित्कस्याश्चिद्वृत्तांतं वक्तीति ऋजवः ५९॥
कश्चिद्वृद्धोऽत्यादवती निजकुलविद्वेषिणीमस्योऽन्यावक्ति अपिकुलनिपुलल्लो रक्तस्तः यद्वा निपु
लोंवुजदिजालकइयमराहूत्तविशेषः एवंच त्प्रतिपालनमुचितमित्यावेद्यते तस्यमूलोऽच्छेदनं एवं

गी॰ चासह्यत्वं द्योत्यते तत्र हेतुः शीलाशालत्कारिणोयाल्लदर्यस्तासाभिः कुत्सितबहुभाषिणिा कोवेरिव
टी॰ कस्मान्नतदेमादेर्विचमादेर्विचमोभोजनेशाषः यः पंकः तुच्छमत्स्यादेर्बकभुक्तत्वादितिभावः म
२॰ एवमाशेयस्याः नचिरात्क्षीघ्रमेवभवतासि एवंचपरोपकारकस्य स्वकुलप्रभवस्य यस्योन्मादव
शान्ममहेतुः खेददासितत्तेहेतुभोजनशोषहेतुवषीघ्रमेवगमिष्यतीतिध्वन्यते ५७ काचिन्नापिका
परपुरुषसंगमायप्रलोभकारिणीदूतीप्रत्याह हेदूति एवंच स्वकार्यमात्रसंपादकत्वनतत्व

अपिकूलनिचुलमूलोच्छेदनहेतुः शीलवीचिवाचाले वकविचमपंकसारानचिरात्का
वेरीभवितासि ५७ अयिविविधवचनरचनेर्ददामिचंद्रकेरसमानीय श्रमसनादिवमे
षू हृति क्व पुनस्त्वं दर्शनीयासि ५८

दीयाग्रिमाकार्यविचारकारित्वमितिद्योत्यते नानाप्रकारशालिवचनरचने एवंचप्रलोभनका
रित्वंवचनानिपुणानांविश्वासानर्हत्वमुत्तरकरणानर्हत्वंचध्वन्यते चंद्रंसमानीयकेरददासि
करतलगोचरंकरोषि अमंभाविनमप्यर्थंजानन्नप्रायंकृत्वाप्रदर्शयसीतिभावः श्रमसनमपकी
र्त्यादि तत्कालेत्वंकुत्रदर्शनीयासि एवंचतयाचाटनामात्रेकर्तृशंका नतत्वपकीर्त्यादि निवारण
मितिभावः यद्वाभाविवियोगभीतानायिकासंयद्दूतमाश्वकारिणींदूतीप्रत्याह विविधवचनरचे २॰
नेरसेनतदुष्प्राप्यापिनायकस्त्वयासमानेतुंशक्यइतिद्योत्यते ॥

मम्सनं वियोगः दुःखदत्वादितिभावः त्वं कुत्र दर्शनीयासि एवंचाग्रे यथा वियोगो न भविष्यतित
थायदि त्वया कर्त्तुं शक्यं तदिदं त्वदुद्दीरितं संपादयामीतिद्योत्यते ५८ अथ कीर्त्यादिनाशस्वपरित्यागं स
भावयंती नायिका दूतीमभाषते म्लानिर्निर्मलेजस्कं तत्र यशस्तु जनो लांछनमपवादमेतत्कलंकं वदत
ओजः यद्दृशान्मैवापि विभाति एवंच प्रमादविशेषः हीयतां तदपि मनायकः सुधांशुर्भूच्छायामिव
एवंचत्यागान्न दैन्यं ख्यायते एतेन यशस्तुल्यः एवंचस्पृहणीयतमो वर्ण्यते त्वां न मुंचतिस्त्वत्पति य
द्दापूर्वोक्तमेतत् ५८ कश्चित्कंचित्प्रत्युपदिशति अथ समये क्रीडाकाले अवलोकनानर्हत्वादितिभावः

अस्तु म्लानिर्लोकोलांछनमपदिशतु हीयतामोजः तदपि नमुंचति सखे त्वं वसुधांछाया
मिव सुधांशुः ५९ अथ तमसोन्यसमये वधिरत्वं वधिरकालसत्वालम्ब्य ॥

अथ भावे वधिरकाले क्रीडाकालीन क्रीडाकर वाक्यकाले ह्यर्थैः पदैः पि श्रुतेप्य च रहस्यत्वात्किया
दिनाम्रतारंभकाले ऽश्लीलपदाभिधानस्य कामशास्त्रेभिधानात् वधिरभावमालंब्य प्रजानांपतिः
एवंच महद्भिरप्येतादृशशरीरमाश्रीयते तत्रकालान्तोऽन्यस्येतिभावः श्रीकेशवयोः एवंचैतादृशसन्नि
धिः स्नेहश्चदुःप्राप्यइतिध्वन्यते प्रणयीप्रीतिमान् नाभिर्मध्यस्तत्र वसतिमान् केशवनाभिव
मतिमत्वाद्ब्रीकेशवयोः समतसमयेयपि ब्रह्मणोमध्यावर्तित्वमितिभावः यद्वा नाभौ सविधेवा

स्तंभयस्य एवंचातिनैकटाद्युच्यते अथवानाभिवसतिमान् उभयोः प्रणयीजातइत्यर्थः
गो॰ यद्वाभयोर्नित्यसान्निध्यात्प्रजापतावुभयसान्निध्यमतेननाभिरवयवविशेषइत्यर्थेकेशवसं
टी॰ बंधवत्वेपिश्रीसंबंधाभावइत्यपास्तं एवंचनिकटवसतिमात्रेनपुरुषार्थः किंतुप्रीतिविशिष्ट
२१ निकटवसतिरितिभावः एवंचश्रम्वादिसविधेश्रम्वादिप्रीतिविशिष्टनिकटवसतिकामस्त्व
मसितत्वेनयैवरीत्यातिष्ठनिध्वन्यते ६ मामियंइर्वचनैर्दुःखयतीतिवादिनंनायकंप्रतिसाखि

श्रीकेशवयोः प्रणयीप्रजापतिर्नाभिवासस्थः ६ अतिचापलेवितन्वन्त्वंनिर्विशासि
कामकाठिन्यः ॥

कामवीतवैवाऽयमऽपराधोनतस्मादितिवति अंतर्निविशन् हृदयमध्येप्रविशन् तयास्वांतेरे
पृतापीत्यर्थः यद्वाप्रथमतः सापुत्रंप्रदर्श्यहृदयंप्रविश्यपेनादृशाचरणंकरोषीत्यत्यंतानुचित
कारित्वंतवेत्यर्थः एतेनिरंतरसंयोगाविभागरूपंविलासस्यमन् एवंचात्तानद्गमानहितंवियोगोत्पते
निकाममऽत्यंतंकाठिन्यंकाठिनत्वंयस्यमः एवंचचापल्यसंपादनेपिनमत्तन्नकरोषीतिदुःख
दस्त्वमसीतिद्योत्यते एतेकाठिन्यमःवयवसान्निविषविशेषः यद्वाअन्यःसदनमध्येएवंचन
वासच्चरितंविलोक्यावधपमेतस्माद्दुःखंभवतीतिभावः एतेसमीचीनवर्तुला लोहकीलोचेदा २१
मिव एतांमत्सरयासिएवंचनवैवाऽयमऽपराधोनतस्मादितिभावः ६ ॥

कयोश्चिद्यूनोः संकेतनिकेतनाभावादेव न संगम इति कश्चित्कंचिदाह क्वचि खंजनयूनोः परमु
त्कृष्टमनोभवस्य एवं च सर्वत्र बाधाकारित्वं ध्वन्यते प्रसरः आधिक्यम् अंगेषु जीर्यति समाप्तो भ
वति यद्वा परं केवलं जीर्यतीति योजना परंतु नानार्गर्भितो निधिर्यत्र एतादृशी या धरामंड
ले केलिर्न निधिमत्प्रदेशेष्वेव खंजनयोः संभोग इति प्रसिद्धिः यद्वा सखी अत्यन्तगुप्तसंके

मखेरयसि स्वयमेतां मदूतां शंकुरिव चित्रगतान् ६१ अंगेषु जीर्यति परं खञ्जनयू
नोर्मनोभवप्रसरः नपुनरनंतगर्भितनिधिनिधरामण्डलेकेलिः ६२ ॥

तेविनातेवाकार्यं कार्यमिति नायिकामुपदिशति खञ्जनयूनोरित्यादिना तिर्यग्जाति म
तया विवेकशून्ययोरपि प्रचुरतरमन्मथविकारवतोरप्यः त्यन्तगुप्तस्य प्राप्तिं विना खंजनयोर
पि न रतिः तत्र किमु वाच्यम् भवादृशाः समीचीनपरीक्षितसंकेतस्थलं विना रतिर्नोचितेति
ध्वन्यते यद्वा मन्मथविकल्पतया मनसः संभोगमपेक्षमाणं नायकं नायिकावञ्चीत्यपि प्रतिभाति
॥६१॥ २१

[Left margin: गो॰ / टी॰ / २२]

मूर्खसविधकृतपांडित्यमनवाप्ततत्फलतयाऽखिलंकश्चिदन्योऽज्ञयासमायते कोषकारः
कीटविशेषः वनेचराणां एवंच कार्याकार्यविधुरत्वं ध्वन्यते पुरः गुणानां नेतृनामझिरणं
कुरुषे यद्विचार्य एवंच पश्चात्तापीकारानर्हत्वं व्यज्यते विदारितमगुदरं यस्य सः कृतपतेगु
णानिः सरंतीति विचारोपेयतिभावः त्वनश्नसि त्वल्लसेनलाभः एवंच मूर्खाणामग्रे गुणप्र
गटनं नकेवलमप्राप्तिकरमपित्वनर्थकरमिति ध्वन्यते ६२ इतीनायिकातिशयंनायक

अपिकोषकोषकारकुरुषेवराणांपुरोगुणोद्गारम् यन्नविचार्यविदारितजठर
स्त्वंत्वल्लसेनलाभः ६३ ॥

वक्ति अगारिणो महिमा कुलप्रतिष्ठा यमामा महिमापदेनावश्यमस्पृहणीयत्वं व्यज्यते लघि
मा गुरुः स्वगुरादिया नन्निषेधति रस्कारादिति भावः नविद्यते पनेच्छाय स्मात्सनेयेधा
स्य वालः एवंचातिस्नेहार्हत्वं ध्वन्यते नाद्दिरोधी प्रसवानन्तरमचिरात्संभोगे तत्पहानिर्भ
वतीति लौकिकं इष्टा इच्छाविषयीभूताऽकीर्तिर्यस्याः एवंचाकीर्तिभीतिशून्यत्वं ध्वन्यते
तस्मात्श्लाघिरागः प्राणापित्याज्याः सूनाः एवंचाऽतिशायशालित्वं द्योत्यते ॥ ६४ ॥

२२

कृतापराधं समाध्यायायाः व्यक्तकपटं नायकं नायिका वक्ति अपराधादन्यागमनासंगदूपात् तद्ग
वेषणार्थमेव तत्र गतमित्यादिकपटवचनरचनामामथिकं व्यथयति एवं च सत्यभाषितेपरा
योपि चेत्तमहं दुःखं व्यथे महतापराधस्य नात्पं तद्दुःखदं तस्वल्पायाः कपटवचनरचनायाः क
थमत्यंतदुःखदत्वमित्यत्र दृष्टांतमाह शास्त्राचारतः आचारपदेनासहृत्य तव्याज्यते न तथा व्यथ
यति यथा सूच्या व्यधः सीवनं तद्दुःखं एवं च सूचीकृते तेनाल्पत्वमाशंक्यमिति भावः यद्वा साधार

अगणितमहिमालंघितगुरुरथेनेहः स्नेहं पयविरोधी रुष्टां कीर्तिं स्वस्य स्वयिरामः
प्राणनिरपेक्षः ५४ अपराधादधिकं मां व्यथयति नव कपटवचनरचनेयम् शास्त्राचा
तो न तथा सूची व्यथयेदन्यायादृक् ५५ असती लोचनमुकुरे किमपि प्रतिफलति यन्मनो
वर्ति ॥

रूपेणाक्षिरिय ५५ कयाश्चिद्दूतीरसनीकदाचिन्नमकरदृष्टापरस्ततांतसर्वमिदं
मयैव दृष्टमिति तेन किंचिद्विज्ञया ज्ञात्वा शंक्यमित्यपरस्तत्प्रत्याह असत्याः लोचयति तल्लोचनं रतस्त
तः प्रसरणशालित्वं व्यत्यते तद्रूपमकुरे मकुरपदेनमंगलेत्वेनावपपदर्शनेयोगमत्वव्याज्यते
किमप्यनिर्वचनीयं मनोवर्ति असत्याएवेतिभावः यद्वा किमपि न लक्षयतीति योजना मनो
वर्तीत्यनेनमहत्त्वातं नेनचबाहिः स्फुटीभावाभावं द्योत्यते यत्प्रतिफलति तन्न ॥

गो॰ सारस्वतमपिचक्षुः सरस्वतीयत्वेनातीतानागतवस्तुग्रहणयोग्यत्वं ध्वन्यते सतिमिरमिव
टी॰ तिमिराख्यदोषदूषितमिव न लक्षयति सप्रकारकं न वेत्तीति किं वाच्यमिति भावः एवं च सा
२२ रस्वतचक्षुर्बोध्येनाहृशीगतिस्त्वत्कार्तीचित्तगतमिति ध्वन्यते यद्वा केवलं पंडितं कदाच
२३ यंतीममतीमालोच्यतं प्रति काचिद्दूत्याह किं सारस्वतं ज्ञानं रूपं चक्षुस्तन्न लक्षयत्यपि एवं च
यथातथ्येन स्वरूपपरिचितिर्दूरापास्तेति भावः एवं च कदाचित्तमपि न त्वया ज्ञायत इत्यत
जडत्वेन सर्वमपि त्वदीयाध्ययनमसत्कल्पमिति ध्वन्यते ६६ नायक दुर्वादकुपितां नायि

सारस्वतमपिचक्षुः सतिमिरमिव तन्न लक्षयति ६६ इतरेत्यनजन्मायो

भूमः सो गुरुसमुद्भवो धूपः ६७

कामस्त्वीसमायत्ते अन्यस्याप्रियस्याग्रमुखे यो दुर्वादो दुर्वचनं प्रियस्य दयितस्य मुखे स एव दुर्वा
दपि वेत्यनेनान्यूनातिरिक्तत्वं ध्वन्यते परिहासः सतिरंजकं वाक्यं अत्र दृष्टान्तमाह अगु
रुमित्रेत्यनजन्मायो भूमः सद्गूपातरानापन्नः अगुरुसमुद्भवस्तु धूपः एवं चायं तदोषान
वदति किं तु कृतकेन नातः कोपो विधेयस्त्वयेति ध्वन्यते यद्वा सा पार्श्वगोक्तिरियं अत्रेव २२

विपरीतयोजनया अप्रियवदनविनिःसृतवचनंसमीचीनमेवेति ध्वन्यते एवंच प्रेमणा मुखत्वमापद्यते कथमेतदीयैतादृशवचनमाकर्णयता लौकिकीयते त्वयेति वादिनीनायिकासमापत्तइतिवार्थः ६७ दुष्टस्वभावनायकं नायिकासखीवक्ति सृष्टभागधेयस्य तत्स्वबुद्धिः कृतकार्थे नतन्यलोभार्थमितिभावः तरला यद्वासमभागस्यकुरङ्गकेनतरला सौरभममधिककुसुमाकानितिकीर्तिः तदनुसारेण विचरंती एवंचतत्स्वभावस्यनता

अपिसमभगाकुरङ्गक तरलाविचरन्ती सौरभानुसारेण त्वयि मोहाय
वराकीपतितामधुपीवविषकुसुमे ६८

तिकंज्ञानंतस्माइतिभावः यद्वा सौरभानुसारेणस्वकीर्तिसंरक्षणपुरः सरंविचरंती पक्षे सौगंध्यानुसारेणविषकुसुमे कुसुमपदेनाबन्ध्यफलजननयोग्यत्वंध्वन्यते मधुपीव एवंच ज्ञानशून्यत्वंध्वन्यते त्वयिवराकी एवंचसरलत्वंध्वन्य मोहायदुःखाय एवंचान्यफलाभावोद्योत्यते पक्षेवैचित्त्याय पतिता एवंच दैववशात् तादृशकार्यं नयाकृतं त्वंचैतादृशाचरणशालीतिदुःखातिशयो ध्वन्यते ६८ ॥

गो॰ कस्याश्चित्सविधे कस्यचित्तरुणमहाजनस्यागमनसंभावनयाऽन्यतरुणागमनविरता
टी॰ वृष्यः तिजरद्भवैः साभुज्यत इति काश्चित्कांचित्सख्याह अयि मुग्धे हं दर्शयो गंधगजः
यद्गंधमात्रादेव गजाः पलायंते स गंधगजः तच्छूकामात्रेण न तु दर्शनादिनेति भावः
२४ दंतयुक्ता गजा दलिता भग्नाः पलायिता इत्यर्थः मत्कुणा दंतरहिताः करिणः केवलं
25 करेणुर्हस्तिनीरुपभुंजते ६९ वहिः ह्रीविमातिशयितलज्जावतेः प्यऽसंयतदुष्टयमि

अपि मुग्धपरान्यस्मिन्पुरपंकामात्रेणादन्तिनो दलिताः । उपभुंजते करेणूः केवल
मिह मत्कुणाः करिणः ६९ ॥

ति काचित्कांचित्सखीति वक्ति अत्यंतविलज्जातिशयः सूच्यते अस्याः पुनः आरभटीप्रौढिविशे
षं कुसुंभवाटी विजानाति नेत्रे तस्या निर्लज्जत्वं द्रष्टव्यमिति भावः एवं च सदने एवं विन
यप्रदर्शपगुर्वादिवंचनेन कुसुंभवाटांकं कनपरपुरुषमुपभुंक्त इति ध्वन्यते यद्वा नेक
वलमेतस्या लज्जावत्त्वदर्शनमात्रेण भवद्भिर्विश्वस्तव्यमिति ध्वन्यते ७० । परं जकगुणा
नामेव गुणत्वं न तु रंजकानामित्याह यत्रेय षड्डिरा अपि मादिता विरलाः एवं च बहुमा॰

त्तित्वेऽत्यंतप्राशास्त्यमितिभावः तैरंतर्गीतैः रंजनासमर्थैर्गुणैः किं न न किंचित्फलमिति ८
भावः गीतेः सगुणाः एवंचगुणैर्गुणगानगीकारैरपि परंरंजकतयागीतैरपिगुणगणैवमावर्जक
व्यवहारस्त्वितिभावः यद्दसौ वनेचरं एवंचग्रामसंबंधाभावेन मधुरशब्दरसानभिज्ञत्वेद्योत्यते हरि
णामपि एवंचमनुष्याणांकावार्तेतिभावः हरतिस्वाधीनताभाजनंकरोति एवंचवनेचरमपि

अतिविनयवामनतनुर्विलंघतेगेहदेहलीनवधूः अस्याः पुनरारभटीकुंभसंभवा
टीविजानाति ७ अन्तर्गतैर्गुणैः किंचित्राअपियत्रसान्तिर्णोविरलाः सगुणोगी
तेर्यद्दसौवचनेचरंहरिणमपिहरति ७१

एवंचनागरिकस्यकावार्तेतिभावः अथचप्रकटीकृतगुणानामेवसार्थिकं नत्वंतर्गतानाना
मितिभावः यद्वा इतीनायकानरसंयोजनायनायिकावक्ति अंतर्गतानेककामलाभिरि
तिभावः यत्रेयषुगुणाषुहिनाअपि एवंचबहूनांकावावार्तेतिभावःसान्तिर्णोविरलाः
गीतिसत्वस्वातिवशिनीतस्याः संगुणोयतू असौवनेचरंहरिणमपिहरति एवंचतस्याएव
कलाकलापःसार्थकःयाज्ञमपिरंजयति एवंचतयासगुणाःपरपुरुषसंगतिमंतराऽन

गो॰ टी॰ २५
25

नायिकां सखी सपत्नीसखीं प्रति वक्ति यथास्थितसकलभूषणां एवं च संभोगे ऽवश्यकस्य वि
भूषणस्योपमर्दः संजात एव स्यात् तस्मान्न सरतं संजातमिति भावः बालां एवं च यौवनशालित्वे
न द्वेषयोग्यत्वं प्रियप्रीतियोग्यत्वं वा ध्वन्यते प्रातः एवं च समयकृतया संभोगराहित्यनिर्णय
त्वाध्वस्यते सपत्नीभिः एवं च द्वेषशालित्वं व्यज्यते बहुवचनेन सर्वासामेकमत्येन नायिकाया
मुत्कर्षनिर्णयो ध्वन्यते प्राक् मृदितम् संभोगविरहेण प्रियप्रेमराहित्यनिर्णयेनेति भावः
प्रथानन्तरं प्रियमस्तके यावकमलक्तकं वीक्ष्य निःश्वसितम् प्रियप्रणामादिना ऽनया ऽभिमा

अललितसकलविभूषां प्रातर्बालां विलोक्य मृदितं प्राक् प्रियशिरसि वीक्ष्य या
वकमः ऽथ निःश्व निःश्वसितं सपत्नीभिः २२ अपि लज्जावति निर्भर निशीथरतनिः
सहांगि सुखसुप्ते लोचनकोकनदद्वन्द्वमुन्मीलय सुप्रभाते २३॥

नः परित्यक्तः इति महत्सौभाग्यमस्या इत्यसूयया दुःखोद्रेकादिति भावः २२ रात्रौ रतिसदनगमने ऽ
णीतिवा गीतेस्मत्कर्षेणपदेश्रीरागाकृत्कर्षेणाकंठमधिवसति त्वन्नाम्नैवसर्वत्रमत्वादिष्वपिमाव
वहरतिइतिभावः पदेत्वन्नीभवतीत्यर्थः मधुरेसंदरेपदे माधुर्यशालिनी गीतइवइयग्रहपदेत्व
भिप्रायग्रहं सततः एवंयस्तहणीयत्वमावेघनेनकरोति एवंचनायिकानइत्यादिनात्वय्यनुरक्ता

स्कृतएवस्कृतहारिणीरागोत्कर्षेणाकंठमधिवसति गीतइवत्वयिमधुरेकरोतिना
थग्रहंसततः श्रीः श्रीफलेनराज्यंत्वगाराजेनाल्पसाम्यतोलब्धम् कुचयोः सम्यकसा
म्याहृतोघटस्त्वचक्रवर्तित्वम् ॥

किंतत्त्वदीयसौंदर्यगुणोत्कर्षेणेतिभावः समीचीनममतांगीकारेसम्यगेवफलंभवतीतिकश्चित्के
चिदुक्ति श्रीरिति कुचयोरल्पसाम्यात् श्रीफलेनश्रीलब्धा त्वगाराजेनतालेनराज्यंलब्धं सम्यकसाम्या
तघटः चक्रवर्तित्वंचक्रासंबंधितंसार्वभौमत्वंचगतः प्राप्तः एवंचनीचानुरणमनुचितमितिध्वन्यते ॥
काचित्सखींवक्ति ॥ श्रोणीति ॥ भूतलेतिनितंबः चलनज्ञानाभावार्थमितिभावः चित्तेभीतिः कदाचित्

गी॰ त्याज्ञेयमितिध्येयेतिभावः उत्संगे प्रियः जार इत्यर्थः पतिभुजे मौलिः पातीतिव्युत्पत्त्या रक्षण
टी॰ मात्रकारित्वं स्वभावेनान्धकारेपिकरादिव्यापारेणाज्ञास्यतीतिध्येयेतिभावः सुखिगुप्तः श्यामः प
तिश्रवणाभिपतिभावः इदमेतादृशमित्यर्थः चेत् यदि सुरतं लभ्यते इतिभावः तृणादिनान्या
१७२ दृशायते असमीचीनत्वमावेद्यते ॥ तदा त्रिदिवं स्वर्गः तृणतुल्यः अगणनीय इत्यर्थः एवं चेता

17२

श्रोणीभूमावेकेप्रियोमंयमनस्मिपतिभुजेमौलिः गूढःश्यामोवदनेसुरतमिदंचेत्तृणं
त्रिदिवं ॥ श्लिष्यन्निवचुंबन्निवपश्यन्निवचालिखन्निवात्मनः दधदिवहृदयस्थानः
स्मरामितस्यामुग्धचेष्टनम् ॥

दृशारतवत्योयाः ताः पुण्यातिशयशालिन्याधन्याः तदभावादहमधन्येतिध्वन्यते नैनचेतादृ
शरतार्थंयतनस्वेति नायकः साधायंवक्ति श्लिष्यन्निति आलिंगन्निवेत्यादयः स्मृतिप्रकाराः
अत्यन्तत्वस्मृतौहेतुः ॥

कुपितांनायिकांनायकसखीवक्ति ॥ शिरसीति हेसमुखि पंकज परुषभाषित्वाभावोव्यज्यते ॥
मस्तकेपादप्रहारंदत्वायादृशीक्रियतांकालिंद्याः कालियइवत्वनयापिचक्रेणत्वच्चरणसंबंधिनत्व
र्थः चिह्नितःपत्तेसंदर्शनचक्रेणांकितः यमुनातोनिःसार्यसार्यसागरावस्थितोगरुडभयनिवा
रणार्थंकालियस्यचक्रचिह्नंकृतमितिपौराणिकाः सःभुजंगःखिंगःपदेसर्पःतेनचैवसर्थः पंकज
त्वयाकोपेकृतेपिभवतीतिव्यज्यते यद्वासखीनायिकामुपदिशति हेसमखि पंकंचोपदेशार्हत्व

शिरसिचरणप्रहारंप्र— यतिःसार्यतांसतेनदपिचक्रांकितोभुजंगः
कालियइवसमुखिकालिंद्याः ॥

मावेघते यद्यपिचक्रेणजनसंरक्षणेनचिह्नितःजनावनेसमूहेचदंभेभेदरथांगयोः शास्त्रभेदेचमे
नायांचक्रंचापिविहंगकेरत्यभिधानात् खिगस्तथापित्वयाशिरसिपादप्रहारंदत्वासतेसदर्थोनिः
सार्यतांपंकजयद्यप्येनेनबहुदीयतेतथाप्यपकीर्तिभ्रयसीभवतीत्यतस्त्वसामीचीन्यार्थमेनंसनिकारं
दूरीकुरुष्वेतिभावः ॥

गो॰ नायिकासखी नायकं वक्ति श्रीश्चैवेति हे सखे हे न प्रीत्या न तत्गुणोर्मुख्यवशग एवं च बहुतरदीयगुणे
टी॰ घुद्दृष्टिमदत्वा स्नेहमात्रमेव तस्याश्चाचितं न वेति ध्वन्यते एतेन तैलेन दीपेन वर्त्तिरिव तया परि
१७३ त्यक्ता सा कृशांगी एवं च सौंदर्यत्वमोघ्यते कृशांगीति वर्त्तिविशेषणमिति भूतिरैश्वर्यं एतेभ
173 स्मतत्प्रचुरा गुणाः सौंदर्यादयः एतेनं तवः तत्प्रचुवावाभवत्र एतत्श्रीश्चैव एवं च तया तस्या
परित्यक्ता या ऐश्वर्यगुणादिकं च तस्याः सर्वमकिंचित्करमेवेति व्यज्यते तेन च तदीयगुणादि

श्रीश्चैव सा कृशांगी भूतिमयी भवत्गुणमयी वापि स्नेहैकवशग भवता त्यक्ता
दीपेन वर्त्तिरिव ॥

मात्रमात्रमेवेदमत्तया तदीनुरंजनं विधेयमिति यदेश्वगुणाद्युत्कर्षवशान्नायकं प्रतीति का
रिणी नायका मालोक्य नायिकासखी नायकं वक्ति । हे सखे हे एकवशग एवं च तव नाया पेत्तेति व्यज्यते ॥
भवता परित्यक्ता सा ऐश्वर्यसौंदर्यादिसुक्तापि श्रीश्चैव एवं च तस्याः संपत्तिसौंदर्यादिमत्तया परि
त्यागेपि न किंचिद्दुःखं भविष्यतीति मनसि विधेयं त्वयेति ध्वन्यते तेन च किंचित्कालं तया परित्य
क्ता सा स्वयमेव त्वामनुनाययिष्यतीति ॥

कश्चित्सखीं प्रति वक्ति । शुकेति प्रतिदिवसं वृद्धिमान् कंदर्पबाणो निशितः दुःखद इति यावत्
सुखमारंभो यस्य सः एवं मदनविशिखीभूतकिंशुकवत् तीक्ष्णावदनः मे शोकः प्रियतमाहृदयं
काष्ठशलाकापंजरं शुक इव दारुपदेन छेदार्हत्वं द्योत्यते एवं च न मया परदेशे स्थेयमिति ध्वन्यते ॥
काचित्सखीं प्रति वक्ति । शुकेति पथिकेन निखिलकौतुकस्थानस्य शुकस्य रूपायः सुतःस्य एवं चा
ति स्नेहपात्रत्वं द्योत्यते तेन च मारणानर्हत्वं तत्वयितत्कारणं संतानुचितकार्यकर्तृत्वं नायिका

श्रुत्वाकस्मिकमरणं शुकसूनोः सकलकौतु
कैकनिधेः जातो गृहिणीविनयभयश्चागम एव पथिकेन ॥

यामभिव्यज्यते आकस्मिकं यन्मरणं एवं च रोगाद्यनुत्पत्त्याः नयामारितं इति ध्वन्यते अत्र गृहि
णयाः एवं चान्यानि कारणानि यत्वा रक्षणीयत्वादि व्यज्यते ज्ञातः एवं च किमकार्यं प्रमदानामिति
ध्वन्यते केचित्तु शुकसूनुरित्यस्य शुकस्य बालक इत्यर्थमाहुः ॥ ६२५ ॥

गो॰ टी॰ १७५

दूतीनायिकांवक्ति शीलितेति अंगीकृतसर्पशरीराश्रयायतयेति भावः अथचकृता लिंगसंभोगा कृष्णेनपरमेश्वरेण क्रोडेनवराहरूपेणनिष्कामितापि अथचदुष्टेनभु जाभ्यनरेणआलिंगितापि भूः पृथ्वी अथचभवंत्यपरार्थावहवोयस्याः सकाशात्

शीलितभुजंगभोगा क्रोडेनाभ्युद्धृतापिकृष्णेन ।
अचलेवकीर्त्यतेभूः किमपरकांतानामवसमस्याः ॥

साअचलेव अथचचांचल्याभाववत्येवकीर्त्यते अत्रहेतुमाह नामेति निश्चयेनवसु मत्याः अथचसंपत्तिशालिन्याः आशाकंतरकिमपीत्यर्थः परवेचपरवत्यास्तवनकिम प्ययशः संभावीत्यतोमहद्भक्तनायकेनसंगतिकुर्विति व्यज्यते ॥

पूर्वनायिकासखीनायकं वक्ति श्यामेति श्यामा षोडशवार्षिकी एतेन श्यामत्वापावि
लोचनहरी लोचनयोस्तस्मिन्नासक्तिसंपादिका तारुण्यवत्त्वादिति भावः एवं चैतस्या
स्तारुण्यवशादेव सौंदर्यं न स्वाभाविकमिति व्यज्यते एतेः स्वसंपादकतया नेत्रहरत्वं मनसि
लग्नं अत्र तत्वविति पदानुपादाने सखीगतदुःखोद्रेकं व्यंजयति इयं बाला धूमपरंपरा ल
ताएदं मालिन्यातिशयजनकतामावेदयति भित्तिस्थचित्रमिव पूर्वकलत्रं लपति

श्यामा विलोचनहरी बालेयं मनसि हंत सजंती लपति पूर्वकलत्रं धूमल
तामित्ति चित्रमेव ॥

हंतेति एवं चैतादृश्याननुचित मन्यतेति भावः पूर्वकलत्रस्य चि
ज्ञापमानतया स्वाभाविकसौंदर्यवत्त्वबहुभाषित्वाभावश्च द्योत्यते बालायाश्च धूमल
तोपमानतया मालिन्यसंपादकत्वप्रदर्शनेन अमतीकार्यकरणायोग्यत्वमावेद्यते श्रा
र्षिकमित्युपमानतया मनसिजरुत्वं च द्योत्यते तेन च बालत्वं समीचीनज्ञानविधुरत्वं
लपतित्यत्र काका सखीप्रश्न इत्यपि भाति अथवा काकाक्षान लपतीत्यर्थः पूर्वकलत्रस्ने
हस्यापि दृढत्वादिति भावः यद्वा नायकः सख्यं वक्ति ॥

गो· प्रस्थितः किमितिस्थितोसीतिपृष्टः कश्चित्सखायंवक्ति प्रातर्याइति अनेकवारं
टी· गमनमनेकवारंपराहृत्तिश्च सर्वथागमनेनायिकामद्विरहदहनदग्ध्यासतीप्रा
१७५ णैर्नवत्स्यतीतिधियेतिभावः प्रातएववारंवारंगाढालिंगनं अचिरेणैवागमि
175 ष्यामिदुःखंमाकुर्विति तन्नधार्यमितिभावः तथाऽनेकवारंगच्छामीतिवचनं तदासा
चेद्गच्छामिनोचेन्नगच्छामीत्येवंविधंएवंचनायकेनायिकाज्ञावशवश्यावर्त्तित्वंतेन

प्रातर्योगतिरावृत्तिः प्रातर्याः कंठावलंबनं प्रातस्तथा प्रातर्यायामीति
वचः स्मरामितस्याः प्रवासदिने ॥

चाल्पतामसक्तिमत्वेतेनचप्रणायभंगाभीरुत्वमावेद्यते प्रसवाकालेइदंसर्वंतस्याःतात्प्र
तीत्यर्थः स्वकृतमित्यर्थः स्मरामि एवंचतत्कालीनावस्थास्मरणान्मज्जातकैवल्यमिव
माहृदयोऽहंगंतुंनशक्नोमीतिभावः यद्वाप्रवासदिवसेतस्यानायिकायाःअनेकग
मनादिकंस्मरामि एवंचतदीयतत्कालीनतादृशावस्थास्मरणेननमयात्रस्थातुंशक्यमि
तिनायकः सखायंवक्ति ॥ १७५

नायिकायास्तावदनुनेयेपि समधिकतरमानमवलोक्याभिमानितयोदासीनं नायकमवलोक्य
प्रशिथिलमानां कयारीत्यानुनेतव्योयमिति विचारयंती नायिकां सखीवक्ति श्रुतेति श्रुतकोकिल
रुताभिः गोपीभिरीशितेष्टः कृष्णः वंशीरवैः कुचविहितनयनः स्वाभिमतमालिंगनरूपमिति
भावः कथयति गोपीपदमसत्वंध्वनयति कृष्णपदं कर्षति चित्तमिति निरुक्त्यातस्यास्वचित्तस्य पराधीन
भावकर्तृत्वमावेदयति एवंचातुर्याभाववत्यो गोपांगना अप्यनासक्तं परमेश्वरमेवंरीत्या स्वयमेव

श्रुतपरभृतस्वराभिः इष्टो गोपीभिरभिमतः कृष्णः ।

स्ववशंतां नयंतीति भावः एवंचैतादृशवसंतसमयेचतुरयात्वया विषयरसलंपटो नायकः कया
चनरीत्या कथंचन स्वाधीनतां नेतं शक्य इति व्यज्यते कोकिलप्रथमरवश्रवणाभिन्नस्य यदभीष्टं तत्सु
ष्टुप्रदेयमेवेति लौकिकं यद्वसंतसमये परदेशागमनमनुचितमित्यकाश्चित्काचिद्वक्ति परपुष्टार
वपरपुष्टाहूतीसदृशाः कोकिला इत्यर्थः तच्छब्दश्रवणाद्गोपीभिः अविदग्धाभिः अभिमतेस्व
स्येति भावः कृष्णः एवंचमलिनत्वंध्वनयति ॥

गो॰
टी॰
१७५

इष्टः स च वंशीरवैः एवं च गोपनमभिव्यज्यते तेन च पुरुषैर्धैर्यं भगनास्वः धैर्यमिति कुच
दर्शनेन इः अनुमन्तुहे धैर्यं मम तं वक्ति एवं च वक्षंतमौत्पागालिन्योगोपांगनाः प्रमत्तनया
समीचीनाम समीचीन पुरुष विवेकमपास्यान्यथाचरणाय प्रवणा भवंति किं पुनः सकलक
लाभिज्ञ इति भावः नायकप्रेमातिशय शालित्वदृमित्यभिमान शालिनी नायकामेवाहऽप

शंसति वंशास्त्यानितैः स्तनविनिहितलोचनेनानुमतं ॥ पादं मुरशिरसि निवि
ष्टं संप्रति मा समंदं वहें दुकूले फलमेतस्य भविष्यति
त्वं च डीचरणोरेणुमृजा ॥

रमाथिकी सखीवक्ति ॥ पादमिति । हे इंदुकुले शंभुशिरसि स्थापितचरणेति हेतोः अभिमानं मा
उद्वह किमितीत्यत आह तपतनस्य गर्वस्येत्यर्थः चंडीचरणधूलिभिः मार्जनरूपं फलं भविष्यति ।
एवं च चंडी मानवती मवलोकनकामं केशा चरणप्रणामे क्रियमाणे चरणरेणुमार्जनं भवतीति
भावः एवं च कृपिना मतस्व वीनां ताडयिष्यतीति मनपताटशगर्वं मा विधेहीति ध्वन्यते ॥

१७५

कथंमयानायासहवाधकेऽस्मिन्नेवस्थलेस्थेयमितिचिंताव्याकुलंनायकंनैवस्थापयितुंना
यिकाइतीकथ्यापिभगवान्वक्ति शाखीति। इहशिरसिशाखिपदंचननरक्षायावर्तंधुनयति नंचा
नेकजनाकीर्णत्वमिरवयदं पतनार्हत्वंगमयति समीरणचलकुलायमखिलंसमीरणपदम
निवारणीयंताधुनयति दोलायितपदंपतनभीतिमावेदयतिकर्मेकधारणं एवंचइहोपाय
विचारविधुरत्वंधन्यते अगणितभयंएवंचभयवत्वेपिनदगणनेनाभिसाहसत्वंद्योत्यते अशिथि
लकेलि एवंचसर्वथाचिंताशून्यत्वंव्यज्यते खगमिथुनं खेगच्छतीतिव्युत्पत्त्यात्रगमनसामर्थ्यं

शाखिशिखरेसमीरणदोलायितनीडनिर्हतं अगणितभयमशिथिलकेलिखग
मिथुनम्॥

एतमनेननिजवसनावतिशयितप्रेमवत्वेधुन्यतेतेनचापरित्याज्यत्वं एवंचात्र
गतंसमर्थः खगोपिप्राक्तनकर्मभोगस्यापरिहार्यत्वमाकलय्यस्वयमतिबाधकवेत्वष्यपरित्यजन्
क्रीडापरवशतयैवकालमतिवाहयतिकथंपुनर्भवान् विवेकवान् महावीरोत्रभीत्यास्थलं
परित्यक्तं विचारयतीत्यनुचिंतनेवत्यतः सवेनानयासहात्रसरतसुखमनुभवान्तिष्ठेतिध्वन्यते।
नायिकानायकचित्तंमाक्षिपतीतिसरजवः॥

गी०
टी०
१७७
177

प्रतिबंधवशात्संकेतः नागमनेन कुपितं स्वकुटुंबवर्तिनं नायकमन्योक्त्या नायिकास्वापराध
त्वमापनमरः परसंकेतेनवक्ति ॥ शुकेति शुक एवंच वचनरचनानिपुणत्वमुच्यते स्मरत
नूपसंग्रामेनारद तद्रसिकसंग्रामपदेन निर्दयत्वंद्योत्यते एवंच कामतंत्राभिज्ञत्वमावेद्यते
हृदये ममेति भावः यानि गोप्यवस्तूनि तेषु सारभूत एवंच त्वदेकतानतापत्रहमित्यवज्यते।
इदंत्वयापि विज्ञायत एवेत्याह सर्वज्ञ एवंच मदीयप्रेमातिशयाज्ञाने सर्वज्ञत्वव्याहतमिति
भावः यद्वा स्मरतसमरनारद हृदये स्यैकंपदं एवंच सर्वदा स्मरस्मरणप्रकारचिंतनकारित्वमा
वेद्यते अथवा नारदपदस्य शरीरावच्छिन्नात्मनि शक्त्या कदाचित्स्त्रीरूपत्वात्स्त्रीभावभवनाहृ
तयाहृदयस्य तत्तद्भाववत्तयाः तिरोधायितस्मरतसामर्थ्यवत्त्वमावेद्यते रहस्यरूपः सतन्मु
खमात्रूप एवंच त्वदतिरिक्तं ममान्यन्नरस्यमितिभावः यद्वा सर्वज्ञातमेकंपदं तथाच हृद्ग
त रहस्यजातप्रधानस्यातिगोप्यत्वेति नवत्वदवज्ञानवत्वसंकेतस्थलप्रतिमदनागमनेहे
तभूत स्वश्वश्रादिनिर्भर्त्सननिवारणाद्रूपरहस्यस्थानंत्वमुकरमिति ध्वन्यते गुरुजनसमक्षेमू
कएवंच सर्वदा सन्निहितत्वेपि स्नेहविषिकाद्यादिनापि स्वश्वशुरादिसन्निधौ वार्ताप्रकरणानवैधि
वत्त्वमावेद्यते यद्वा गुरुर्जडः रहस्यधारणानभिज्ञ इति यावत् योजनः अर्थात्त्वदीयः मदीयो वा

१७

ॐ तत्समवलम्बक एवं च सीमायामेपि पर्यङ्कमाकाश्यनाहं तानहं तामविचार्यकारि मयातिशायितविवे
कितमावेद्यते प्रसीद जङ्घफलेदलय एवं एवं च प्राकृतेन मदीयसंकेतभङ्गापराधमवगण्यायेदानीं ज
ब्रूहि त्वा दस्त्वयाक्षेप्यं मयाप्यागमने एवं ज्ञातिनेत्रैति ध्वन्यते एवं च फलमित्येकवचनेन सहृदये ॥
यद्वा संकेतागमनजनितविलम्बवशात् समयेऽभद्यापाप्राप्तात्तु भीते शुकमवलोक्य समाविनय
मयं गुरुजनाय निवेदयिष्यतीति भीत्या नायिकां तत्प्रसादयितुं वक्ति शुकेति ॥ कीरपदं विहाय
शुकपदोपादानेन नवाभासात्मजशुकाभेदबोधनक्रोधाभावौचित्यमावेद्यते स्वरतसंग्राम ननारद एवं च त्व
दीयवचनरूपोद्दीपनवशादेव मया संकेते न गतमतो नायं ममापराधः इति व्यज्यते यद्वा त्वदीयसं
पादनाय गतायां मयि क्रोधकरणमनुचितं नवेति व्यज्यते एवं च नारदर्ष्यभेदप्रतिपादनेन नायि
कोपकरणानौचित्यमावेद्यते हृदयरहस्यैकमार सर्वज्ञ एवं मदीयमनोजपीडाज्ञानवत्त्वं तवास्ती
कारायगतायां मयि कोपकरणं तव कथं नानौचितीमावहतीति भावः सर्वज्ञपदेन पवन्नाभेदप्रति
पादकेन हिंसामात्रस्यापर्ममापनत्वसमर्थनप्रवणस्य तव कोपकरणेन मन्मरणमेव भविष्यतीत्यत
स्तत्कारणमेवौचितमित्यावेद्यते यद्वा सर्वपदेन परमेश्वराभेदप्रतिपादनेन ममत्वदतिरिक्तं नान्य...

गो॰ स्यामस्मीतिध्वन्यते तेनचमत्कृतापराधत्वमाहितं यदंतर्यामित्वेनमदीयमन्यथवेदनात्तान
टी॰ वदन्नेवेतिध्वन्यते गुरुजनसमक्षमूकत्वेनगुरुजनसमक्षेवचनमात्रमात्राभाववत्तयामत्कृता
१७८ पराधकथनस्यासंभावितयाकोपफलाकरणेनिरर्थकं तत्करणमनुचितमितिध्वन्यते अतः
प्रसीदंजन्मफलंदलय एवंच नकेवलंमयास्वार्थएवकृतः परंतुत्वदर्थोपि संपादितइतिव्यज्य
178 ते ॥ ॥ बहुतरपरिग्रहाभावं व्यनक्ति स्पष्टार्थां लिंकचनकाष्ठदन्तोन्यावक्ति ॥ शिरस्मिति ॥
हेरुद्रशिरस्याकपर्दंजटाजूटंग्रर्धंचराटिकांवहसि रोदनंकृत्वापिरजतंअर्जयसि सोरोसीत

शिरसावहसिकपर्दंरुद्ररुदित्वापिरजतमर्जयसि अस्याप्युदरस्यार्धंभजनतस्तवैवेति
कस्तत्वम् ॥
तदस्यरुद्रत्वमित्यार्थवादात् रोदनादजनोत्पत्तिरितियद्यपिअग्नेरवायमेव
संबंधस्तथापितस्याग्निरोदनादजतोत्पत्तिस्तथाप्यष्टमूर्त्तितयाग्निरूपोरुद्रइत्यर्थः अस्यएवंचाप
लाप्यानहत्वंध्वन्यते उदरस्यअर्धंसमोंशकअर्धंसमेंशइत्यमरः विभागकालेकिंचिदधिकाग्रह
णेनातिकृपणात्वंध्वन्यते भजनतामपवतत्वकः वेत्तिनकोपीत्यर्थः एवंचपरिग्रहाभावेत्वदेन्या
दिनाद्रव्यार्जनकरणमनुचितमितिव्यज्यते ॥
१७८

कश्चित्कामी मान्यवनितामन्योक्त्या वक्ति श्रोतव्येति हे केतकि दुष्टसर्पव्याप्ते नः अस्माकं त्वं निश्चयेन स्पृ
श्या न किंतु मधुपैरेव श्रोतव्यैव न तु ग्रहीतुं शक्येत्यर्थः तत्रापि भुजंगरक्षणस्य सत्वादिति भावः केतकु
पमानत्वे गौरत्वसमानोपमेः एवं च सर्वथा स्पृहणीयत्वेपि विटैनैकसेनत्वुर्घटा त्वत्संगतिरस्माक
मिति व्यज्यते यद्वा मधुपैरेव श्रोतव्यैवेति काक्वा नेत्यर्थः किं बहुना दृश्यत्वेपि च दूरे एव वदूरदृश्यैवेति
काकोनेत्यर्थः किंतु निकटे स्पृश्या एवं चेत्त्वत्कृतः संगतिं संपादयसीति अत्राह दुष्टसर्पव्याप्ते केतकि त्वं

श्रोतव्यैव मधुपैरसितांशुकलेव दूरदृश्यैव दुष्टभुजंगपरीते त्वं केतकि नाबलनःस्पृश्याः ॥
श्रवणोन्नीतगुणाया समर्पयंत्याश्च गणस्य कुसुमानि मदनधनुर्लतयेव त्वया वशीकृतीति

नः न स्पृश्या एवं च जीवनदाननिदाघतापापनोदनस्वरूपायास्तव लेकघोपि तोस्मि ॥
स्विंगभियानास्माकमागमनं भवतीति व्यज्यते ॥ नायको नायिकां वक्ति श्रवणेति गुणाः सौंदर्या
दिः श्रवणान्नायिकायाः ज्याच नमस्कृत्य तेभ्यं नप्राप्यपुष्पाणि अर्थान्नायिकापि प्राप्तिनीतीति भावः मदन
बाणानां पुष्पमयत्वाच्च समर्पयंतं मदनधर्मलतयेव हे हति त्वयास्वाधीनतां प्रापितोस्मि एवं च म
यावश्यमागम्य एवेति व्यज्यते ॥

गी. कश्चित्कंचिदन्योक्त्यावक्ति शाखोटकेति शाखोटकस्य वृक्षविशेषस्य शाखायामुटजं पर्णि
टी. शालां तत्संबधिनो येन मनुष्यः काकाक्लेषु पूज्य काककेष्वेष्टितियावत् यद्वा संडद्विजं यच्चिरकाल
रटयत इदं देवता आदरस्थानं नभवान्नेव प्रमाणपुरुषः शुभाशुभनिर्णयार्थमिति भावः एवं
१२९ चत्वादृशमुत्वाधिष्ठिते तादृशास्थले नास्मादृशां विदुषां च चासामवकाश इति ध्वन्यते ॥ कस्यचि
179 द्दूतीकाचिद्वक्ति ॥ पापीति ॥ चंद्रकलोपमेयशोभायाः यद्वा चंद्राङ्गश्री सदृशोभायाः एवं

शाखोटकशाखोजनैर्बोनस पूज्य करटरटकचिरम् नादरपदमिदमगणकः प्र
माणपुरुषो भयानेकः ॥ पापिरे खोपमकांते तवान्यपाणिग्रहे प्रयानायाः
मदनास्त्रिपुत्रिकाया इवांगशोभाकदर्थयति ॥ =

चनिःकालंकमयादृश्यमानं त्वयुक्तमित्याक्षेपे अंगश्रीकथ्यतेरेखेत्यभिधानात् अन्यस्यपाणि ऊ
ग्रहे प्राप्तायां तव मदनछुरिका इव अवयवशोभाकदर्थयति कदर्थयिष्यति एवं च मङ्क
नायकस्यैव त्वया संगतिः कर्त्तव्यान्यस्येति व्यज्यते न च तस्मिन्नसौंदर्यमिति भावः
चंद्रको वक्राप्रियछुरिका भवतीति चंद्ररेखोपमानमा द्वितीयव्याख्यायां कश्चिन्नेत्र १२९

समीचीनत्वेनैरेवस्वामिकार्याद्यमाग्रहः क्रियतेनान्यैरितिकस्मिंश्चित्कचिद्धक्ति शैथिल्येनेति मांघया
मान्यपि अथचअथतवतोपिसमीचीनत्वेनशालिनः अथवृत्तेलाः पोषकस्यअथचपारकस्यक्लृप्तस्तेन
मृजंति अत्रार्थान्तरन्यासमाह बलवतापवचनिवारणानर्हंत्वव्यज्यते इहैत्याक्रुष्टेकंकणानिधावंति
प्राप्तंकुर्वंति एवंचस्वहृतत्वादेवचेतनावलयाअप्येवमाचरंति तत्रकावार्तासचेतनस्यामितिभावः ॥ शा
कारव्रज्याव्याससमाप्तिमगात् ॥ नायकोनायिकांवक्ति ॥ षड्चरणेति भ्रमरत्वपकेटिसेविनमदनपत्र

शैथिल्येनयुतान्यपिभर्तुः कार्यंत्यजंतिनस्वहृताः बलिनाकृष्टेवाहोवलयाःकूजंति
धावंति ॥ षड्चरणाकांटजष्टपरागकीर्णामायुधंमुक्त्वा त्वांसृष्टिमेयमध्यामधुनाशा
क्तिंस्मरोवहति ॥

मौर्व्यामधुकरत्वोपत्वादितिभावः परागः पुष्परजस्तत्वोपकाण्डचूर्णापूर्णांमदनधनुषःपुष्प
त्वोपत्वादितिभावः आयुधंशासनमित्यर्थः त्यक्त्वा स्मरः अधुनापुष्टिनामयः मृध्यायस्याःतां
कृशत्वादितिभावः त्वांशक्तिंत्वद्रूपांशक्तिंवहति एवंचत्वामासाद्याधुनामदनवीरोतिप्रबलः
सहृत्तइतिध्वन्यते वहतीतिपाठेजातयौवनांत्वामासाद्यकंदर्पइदानींजगज्जयंकरिष्यतीति
ध्वन्यते ॥ इतिषकारव्रज्याव्याससमाप्तिमगात् ॥

सपत्नीदुःखदुःखितां नायिकां नायकसखी वक्ति सेति ॥ सा नायिका दिनकार्यकारणात्
तस्य केवलगृहिणीति स्थित्य वर्तते दिवससंबंधिद्वितीया तिथिरिव राज्ञोऽन्ते सेव्यासि एवं च गृह
कार्यार्थमेव केवलं सा त्वं तु स्मरतन्त्रसुखार्थमिति भावः एवं च तस्यामीर्ष्या न विधेयेति ध्वन्यते ॥
सखी नायिकां वक्ति स्तनेति त्वदीयस्तनसंबंधितात्कालीननखरेखालेबिंदुसमूहः पट्टसू
त्रप्रविशन्मौक्तिकप्रकरइव शोभते नूतनपदेन नखरेखायामारक्तत्वं ध्वन्यते ॥ एवं चे
दानीतनस्मरतेननवातिशयशालिपोभासंहते ते ध्वन्यते । अथ चैतादृशप्रस्तावरतचिह्नदर्शि

सा दिवसयोग्यकृत्यव्यपदेशात्तस्य केवलं गृहिणी तिथिर्दिवसस्यपरा तिथिरिवसे
व्यानिशि त्वमसि ॥ स्तननूतननखलेखालंबीनवघर्मबिंदुसंदोहः प्रभाति पट्टसूत्रप्र
विशतिव मौक्तिकप्रसरः सौभाग्यगर्वमेकाकरोतु पृथ्व्याभूषणाकरिणी अन्याया
सवतोर्यामदाधर्यो मध्यमधिवसति ॥

नेपि मया किंचिल्लक्षणमिति वदसी यतस्त्वतल्पा नान्याप्रतारिकेति ध्वन्यते सखी सामान्यवनितामु
पदिशति । सौभाग्येति पृथ्व्यकरिसमूहस्य भूषणाकरिणीं प्रकाशसौभाग्यस्य गर्वं करोति अ
न्यस्तु योर्मदशालिनोर्या मध्यमधिवसति एवं च सर्वनायकसमानं त्वया विधेयमिति ध्वन्यते ॥

पतिनमवत्पतन्मात्वीवंचनादिकंमप्युपेत्यापश्चात्पतिनमासतीस्वयमेवाप्रियसविपमागतामा
त्वीपरिहृतंतमालोकानाम्रवलत्तुनागोपनायनायिकानायकंवक्ति ॥ स्वचरणेति स्वचरणापी
डयाअनुमितायात्वमकपीडनयाविशेषेणायहृतमात्मर्योस्वयंकृतापराधा पतिविहितप्रण
तावपिकोपकरणादितिभावः सभगविनाप्रयंतमदागमनादितिभावः नामनुनितं ग्रहमा
याता एवंचोनेनप्रियतमेनबहुतरप्रणमादिनामदनुनयः कृतोस्तीतिठाज्यते। यद्वास्वयमे
वोत्कठितानायिकानायकसविधमागतातत्रतत्कालोचितादिकमवलोकानाकारितसंभाव्यमान

स्वचरणापीडानुमितत्वन्मौलिरुजाविनीतमात्मर्या अपराद्धासभगत्वांस्वयमहम
नुनेतुमायाता ॥ स्नेहमयान्पीडयतःकश्चितक्लेशोपितैलकारस्य ॥

लाघवपरिहारायमृषैववक्ति स्वचरणेति ॥ अनुरक्तजनक्लेशकर्तः सेनादिकंनमम्यककिंतु
प्रबलविपक्षलक्षविघ्नचकस्पेतिकश्चिद्वक्ति स्नेहमयानिति तैलप्रचुरान् अथचप्रीतिप्रचुरा
न्पीडयतः तैलकारस्यचक्रेणापियंत्रविशेषेणापि अथचसेनयापि शास्त्रभेदेचसेनायांचक्रमि
त्यभिधीयते अपिनाकोषादिसंग्रहः यःपार्थिवान्पृथिवीविकारान्घटादीन् अथचमहीपतीन्

गी॰ चालयति भ्रामयति अथ च स्वस्थानभ्रष्टान् करोति सकुलालोपि अपि नानिघत्वमावेद्यते
टी॰ परमुत्कर्षश्च चक्रवान् यंत्रविशेषवान् अथ च सेनावान् यद्वा यथास्थित एवापि एवं च सामर्थ्य
विशेषवत्त्वमावेद्यते एवं च सेनादिसत्त्वमात्रेणानप्रतिष्ठा किं तु स्वानुरक्तसंरक्षणपरविग्र
१८ वाणाद्युपकार्यकारित्वेयति व्यज्यते। सा वीनायिकावक्ति। सरले इति हे सरले बहुभंगाभंगेव
(181) क्रताविच्छेदः तरंगपुञ्जबहुरसा बहुविषयकप्रेमवती यद्वा शृङ्गारादिमती बहुहर्षवती बहु

चालयति पार्थिवानपि यः सकुलालः एवं च क्रीसरलेन वेदस्यवती बहुभंगा बहुरसा ब
हुविवर्ता गतिरसती नेत्राणां प्रेमणां स्रोतस्वती नाच ॥

जलवती च बहुविवर्ता बहुकापथवती अनेकप्रकारवती बहुजलभ्रमवती च असती नयना
नां प्रेमणां नदीनां च गतिः कटाक्षादिः स्थितिः गमनं च इति भवती न वेद एवं च प्रेमणाभंगादिकं
नियतमसतीत्यतस्त्वं रक्षणाडम्बरणमनोत्यताभिमानं परित्यज्य नायिकसमाधानं कुर्विति ध्वन्य
ते क्वचित्केनतिमिति बहुभंगमित्यादि पाठ इति यदाख्याहारभावः ॥ १८

हे सखि एवं च रहस्यं कथनार्हं त्वं सूच्यते मध्याह्ने द्विगुणीभूतासूर्यकिरणश्रेणीतया पीडि
ताया छाया आलवाले मज्जितमिव समन्तात् वृक्षमूलं समाश्रयति एवं चैतादृशमिदाचकाले न
कापि स्वगेहाद्बहिर्गच्छतीत्यपवनेनायकं नय अहमप्यधुना तत्रागतप्रायेति ध्वन्यते यद्वा
सखी नायकं वक्ति एवं च यत्र प्रखरतरचिकरनिकरविकलाः प्राणिनोऽपि त्यक्तकामा जङ्गविछा
यास्वाश्रयं न परित्यजति तत्र किमु वाच्यं त्वया पादपदारविंदं विदायतृणमपि किंचितेवद

सखि मध्याह्ने द्विगुणाक्रमणाकरश्रेणीपीडिताच्छाया मज्जितमिवालवाले
पवितस्तरुमूलमाश्रयति ॥

वृत्तेऽपि हे देवाः स्थेयमिति द्योत्यते मत्प्रियो मय्यतिशायितानुरागवानिति वादिनीं काचित्का
चिद्वक्ति सखीति हे सखि स्वराणुश्रेणिवत्येनेन त्वदुक्तिरं किंचित्करोतीति ध्वन्यते अयं मम प्रियः
परोऽन्तेऽप्यपरोऽन्ते वान्ये दृष्टो नायके निरंतरसंगतिपालितमावेदयति गृहे येनैव मार्गेण
आगतस्तत्संबंधिनगरग्राममनदीः स्वसहायगणान् अन्यान्पृच्छति एवकारेणादृष्टमार्गाय
नगरादिप्रश्नकरणमुचितमिति ध्वन्यते ॥

एवं च मन्नाको मय्येतादृशानुरागवान् यत् चिरकालीनमार्गगमनागतेनाप्यवश्यविज्ञेयपत
नाद्यानाभाववानिति मन्नायकतुल्यो न त्वन्नायको न वा मत्तुल्यास्त्वमिति ध्वन्यते यद्वा प्रियतम
मे मानादिकं त्वया विधेयमिति वादिनीं सखीं नायिकां वक्ति सखीति स्पृष्टा शिवेति स्मानुपादने

सखि स्पृष्टा शिवे मम प्रियो यं गेहं येनैव वर्त्मना यातः
तन्नगरग्रामनदीः पृच्छति मम सागमनानन्यान् ॥

पिश्रवणाक्रियाप्रतीतिरनुपयुक्तार्थितया स्पृष्टा शिवेति पदमवधारणां लक्षयति एवं च मदुक्तौ ना
प्रामाण्यमाशंक्यमिति निघुन्यते एवं च मन्निमग्नचित्ततया प्रियतमः स्वयमुल्लंघितवर्त्मौ ष्यिता
नेककौतुकनिधाननगरादिज्ञानाभावात् अतएतादृशे मानादिविधाने न दुःखस्वजनेन म
नुचितमिति द्योत्यते ॥

वियोगिन्याः सायंतनसमयोत्पन्नदुःखदइति नायिकासखीं वक्ति सायमिति अत्र सखीति॥
पदानुपादानं तावद्दुर्योगाच्चोरेपि कालातिपातो भवतीति भावि सायंतनसमयस्यातिदुःख
दत्वमित्यावेदयति सायंतनसमये सूर्यः अनलं विशति असावनलः मन्मथशरं विशति सच
मन्मथशरः विरहिणीचेतः विशति इदमपि विरहिणीचेतोपि तमः समुदायं तमः प्राहुर्ना

सायं रविरनलमसौ मदनशरं सच योगिनीचेतः
इदमपि तमः समूहं सोपि नभो निर्भरं विशति ॥

नानं रवानं च सोपि तमः समूहोपि अतिशयेन नभः विशति अनलेत्यादि पंचपदं द्वितीयया कर्मत्व
प्रतिपादनादीप्सिततमत्वेनैव ह्रस्यातत्रतत्र तस्य तस्य कृतप्रवेशस्य निवारणान्नैव मोक्षयते
एवं च यथा यथा रात्रिर्निगमिष्यति तथा तथा मे चेतः सूक्ष्मपताभविष्यतीति परिक्षीनतले नवदने
नात्मानं मम प्राणप्रदो मन्मथस्तव रसाद्युनेव प्रियतमानयनार्थमिति ध्वन्यते ॥

ओं गो॰ टी॰ १८३ 183

काचित्कंचित्संकेतं वक्ति स्मरेति ॥ मदनयुद्धसमये मदनवीरसमरे इत्यपि पाठः पूरितो
यः प्रावल्लत्तलाद्विगुणितपुष्टकंठनालः कपोतः जयेच्छावानिव जर्जरप्रासादोपरि
कूजति शीर्णपदेनामानारोहणीयत्वं ध्वन्यते प्रासादपदेन श्रमापनोदकसमीरणावत्त
यानिर्भररतसंपादनयोग्यत्वं ध्वन्यते उपरिपदमन्यानवलोकनीयत्वमावेदयति कलर

स्मरसमरसमयपूरितकंबुनिभद्विगुणापीनगलनालः शीर्णप्रासादोपरि जि
गीषुरिव कलरवः क्वणति ॥ स्फुरदधरमविरतास्वध्वनिरोधोत्कंपकुचमिंदरु
दितं जानूपरिनिहितहस्तन्यस्तमुखं विदन्नशाप्रक्रान्तेः ॥

वपदेनोद्दीपकसत्वं द्योत्यते । फूत्कृत्य रुदतीमस्वीमिवाचयति । स्फुरदधरमिति स्फुरन्नधरो
यस्मिन्निविडध्वनिनिरोधेनोत्कटकंपं वेपनौ कुचौ यस्मिन् जानुन्यस्तहस्तस्थापितवदनं इदमेता
दृशः प्रकारशालि रुदितं सरलप्रकृतेः एवं चैतदत्यया चरणं तवानुचितमिति ध्वन्यते स्फुरदधरप्र
स्तावसि मित्यपि पाठः यद्वेतादृशरोदनेन कस्यापि ज्ञानं न भविष्यतीति फूत्कृत्य रोदनं न वाचित
मिति सखी नायिकां वक्ति ॥

ॐ काचित्सामान्यवनिता काचित्सामान्यवनितां भंगपत्नेरेणावक्ति ॥ स्वयमिति । स्वयमाहृतैः भद्रैः
कुलायस्तृणैर्वितद्दयितं पुष्णन्ती सहजप्रेमरसाभिज्ञा बलाकासौभाग्यशालिनी गर्वं वहति सु
भगेति भिन्नपदं वा एवं च यथा स्वद्रव्येण नायकपोषणं क्रियते सैव रसाभिज्ञा सौभाग्यशालि
नी गर्वं वहति ~~सुभगेति भिन्नपदं वा एवं च यथा स्वद्रव्येण~~ नापरस्मात्तदहरहन्नमुचितमिति ध्वन्यते
दुष्टप्रभुणा कोशाधिकारे दत्तेपि प्रभुरयं मय्यतीव विश्वस्त इति धियानत्तेस्वनमुचितेनेति क

स्वयमुपनीतैस्तृणैः पुष्णन्ती नाडनिर्हृतं दयितं सहजप्रेमरसज्ञा सुभगा गर्वं बकी वहति ॥
स्वरसेन बध्नता करमादाने कंटकोत्करैस्तुदता पिशुनानां पनसानां कोषो भोगोप्यपरि
णामः ॥ ॥

श्चित्कंचिद्वक्ति स्वरसेनेति स्वेच्छया करं दण्डं बध्नता कुर्वता आदानेन ग्रहीत्करा
दानेन कंटकसमूहैः तुदता स्वरसेन स्वेनेन क्रियते येन नभुक्तं क्रियते इति लोपश्रूयमाणस्य मावेधने कंटको
त्करैस्तुदता मित्स्वेनेन स्वेच्छयाकृतमिति दण्डग्रहणैः ग्रहणेन गृह्णातीति ध्वन्यते अथ च स्वरसेन द्रव्ये
णाकरं हलं बध्नता पनसारसम्पत्तिं लुण्टनात् दितिभावः कंटकोत्करैस्तुदता पनसस्य कंटकबा
हुल्यादिति भावः पिशुनानां पनसानां च कोषस्याजागारस्य भोगः संपर्कः तद्विषयाधिकार

गी॰ वत्वादितिभावः अथ च कोपापरिघूर्णितापि अविद्यामात्मस्पदत्वमावेदयति अथ च स्फुटत्वसर्व
टी॰ देवीमस्यापि कठिनत्वादोषसत्वात् समुच्चायकः अविद्यास्यपवंचकोऽयोऽभिरस्मात्सविनिहित
धियानुसंधिगापि ध्वनः सेव्याइति व्यज्यते ॥ सरलतयां मानाद्यविधायिनी मामिनो मत्वीमनु
१८४ पदिशति ॥ सौभाग्यमिति ॥ स्वशरीरस्य चित्रशिल्प इत्यनेन ॥ कार्यान्तमपि वमुष्टिवामार्धस्ये
184 वादस्तत्रकावानी कार्याण्येव वपुषीति व्यज्यते देवाः वामार्धमेवमस्व मममायाकमेवदेवीदक्षि
णशरीरभागस्यापि वक्रूपत्वादितिभावः अर्धमित्यनेन दक्षिणैकदेशस्याप्यनिवेशनेन तत्त्वनके

सौभाग्यं यदाक्षिण्यपात्रेत्वयि परिदृष्टं हरेराननहरणी नाम ॥

वल्लभोदासीनमपि तद्वेषवन्नेति ध्वन्यते व्यापयन्नाङ्गरेणाननहरणानां दाक्षिण्यपात् सरलत्वात् सौ
भाग्यं वङ्गमुपदिष्टं हरपदेन हरति सर्वस्य दुःखमिति व्युत्पत्त्या करुणावतापि भगवताऽङ्गीकारे =
णाकरुणारहितस्यापि सर्वेनायकस्य कटाक्षितं न प्रीतिविषय इति व्यज्यते येष्वापदेशाद्यानां न हेत्व टि
मध्ये वापदेशेयत्रयातत्वपवंचाङ्घ्रिष्टाभ्यां वामदक्षिणापदाभ्यां कौटिल्यादिवनहरणी सौभाग्यं न स
रलमयेति ध्वन्यते नहरणीनामित्यनेनानैवमिदाक्षिण्यमनुचितमित्यावद्यते उपदिष्टमित्यनेनना १८४
त्ययासंभावनमनुचितमिति ध्वन्यते। पंचसरलता विहायमानाद्यवधंतयाविधेयमितिध्व

यद्वा कौटिल्यशालिनं नायकं नायिका सखी वक्ति ॥ स्ववपुः श्लिष्य देव्या वामार्धमेव निवेशयता हे रे
गाद्यातिशयात्सौभाग्येनेति स्मरेणेनामुपदिष्टेन तनुं पुंसां एवं च स्त्रीणामेव वामाकरणमुचितेन तनुं स्वामि
नि भुज्यते यद्वा स्मरेणेनामेवेति योजना नायिका सखी नायकं वक्ति ॥ सुभगेति हे सुभग सभवनमितो
समाकृष्य दर्शयित्वा स्मरतनुः पीडिता वेषेषु विशेष हे षट्दधती सा पीडयैव जीवति एवं च त्वत्कृतनपीडापि
यत्र तस्या जीवनं तिष्ठति तत्र किं वाच्यं त्वत्संगम इति ध्वन्यते उत्सववशात्त्वद्भवनमागताबलादेला
ब

वामार्धमेव देव्याः स्ववपुः श्लिष्य निवेशयता ॥ सुभग सभवनमितो भवता
समृध्य पीडिता स्मरतनुः सा पीडयैव जीवति दधती वेषषावि
हेषम् ॥

त्वया दृढालिंगनादिना संपीड्य सानुरागातिशयशालिनी प्रिया येदानीमुदासीनवत्स्थीयते इत्येतद
नुचितं तत्रैवेति भावः सुभगत्वं चाकस्मिकेनादृशनायिकासंपर्कवत्त्वादिति भावः सपदेन भीतिसूच
नं त्वं नायके नायिकायां सख्यादिरहितेन सहायशून्यत्वमावेद्यते भीतावित्यनेन निर्गमाभाववत्त्वं द्यो
त्यते भवत्येत्यनेन बलात्कारो ध्वन्यते ॥

नायिका सखीं नायकं वक्ति । सेति गुणाः सौन्दर्यादयः एते गुणास्तु स्वभावेन सहजतया शुद्धान्तःकरण
मेते स्वभावो तेन लोकरग्रेहस्तास्वाधीना एवं च पातिव्रत्यमेव द्योत्यते एतेहस्तेन यदंगीकरणं तेन नायकेनाका
श्मीरमालेव सुतनुः एवं च स्पृहणीयत्वं द्योत्यते बहुविचारवताश्चत्यनेककलाकुशलेनेत्यर्थः एते बहु
तरागमोक्तमंत्रयज्ञेन एवं च बहुतरजयशालित्वं द्योत्यते भवता भ्रमता एवं च त्वत्संगत्या कदापि नैत
स्या विश्रान्तिरिति व्यज्यते यद्वा सामान्यवनितासखी नायकं वक्ति करग्रहेणास्वाधीनानतद्व्यादि

सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता भ्रमिता बहुमन्त्रविदा भवता
काश्मीरमालेव ॥

लोभेनेति भावः स्वभावस्वच्छेत्यनेन सरलत्वं व्यज्यते बहुमंत्रविदानेकप्रकारकविचारवता ॥
एवं च कार्ययशालित्वं द्योत्यते भ्रमं प्रापिता एवं चेयं भ्रान्ता त्वामस्थिरप्रकृतिकं भजते त्वं तु न किम
पि वस्तु ददासीति ध्वन्यते अन्योऽपि मंत्रवित् किंचिज्जनं भ्रान्तं विधाय तदीयसर्वस्वापहारं करोतीति
लौकिकम् ॥

नायकोनायिकांवक्ति सव्रीडेति हेव्रीडासहितस्मितसभ्रूभङ्गे किंचित्स्पृष्टा किंचिदस्पृष्टा एतादृ
शेयवमयेतिभावः आकस्मिकसंजातसंघट्टेनापिलोकभीतिवशादितिभावः अतएवव्रीडास्मितव
त्यानायिकायाः अपसरंतीयथायथाहृदयेविअपसरसि तथाममहृदयंस्पृशसि एवंचेदानीमहंनानुग्रा
ह्यस्त्वयाचेत्तदानेमशरणाः प्राणाः स्पृशन्तीतिव्यज्यते यद्वास्पृष्टापिअस्पृष्टेवाहमित्यपसरंतीयथायथा
अपसरसि तथाममहृदयंस्पृशसि एवंचनाहंत्वयास्पृष्टेतिवादिनी अपसरसि हृदयंचस्पृशसी

सव्रीडस्मितसभ्रूभङ्गस्पृष्टास्पृष्टेवकिंचिदपयाती
अपसरसिहृदयेयथातथाहृदयंममस्पृशसि ॥

मतएवालिंगस्वमामिति
त्वपसरणानर्थक्यं
व्यज्यते स्पृष्टीभूतेवकिंचिदपयातीत्यपिपाठः षष्ठीसंपूज्येतिपाठेपिप्रसववनिमित्तके एवव्रीडास्मि
ते किंचित्षष्ठीसंपूज्ययथाकथंचित्किंचित्षष्ठीपूजयित्वेत्यर्थः यथायथाअपसरसितथातथाहृदयि
मनहृदयंस्पृशसि षष्ठीपूज्येवेतिपाठे पूज्याषष्ठीवत्त्वं यथायथापसरसितथाहृदयेममहृदयंस्पृशसि
एवंच यथापसरंतीषष्ठीस्पृशति सनजीवतितथाकृतषष्ठीपूजयात्वयास्पृष्टेममहृदयंनास्थिति
प्राप्नोतीतिव्यज्यते तेनचममालिंगनचुम्बनादिदेहीति ॥

गो॰ निजप्रियतमपवरतिर्विधेयानान्येत्येतिवादिनीसखीनायिकावक्ति सखीति हेसखि प
टी॰ वेचवास्तवाभिप्रायकथनार्हत्वमावघते अत्रचकाशप्राप्तः संकेतवशात्समयविशेषेसमा
१८६ गतइत्यर्थः प्रियान् यथासुखमुत्पादयति तथानिजप्रियान्न अमुमेवार्थमर्थान्तरन्यासेन
186 द्रढयति अवारितात् महतइतिभावः वतात् वातायनसंबंध्यनिलः शीतः तापापनोदकः
एवंचान्यनायकमवश्यमानयेतिध्वन्यते यद्वानिजदयितानुरक्तानायिकामन्यदपितेनस

सखिसुखयत्यवकाशप्राप्तःप्रियान्यथातथानगृही वातादवारिता
दपिभवतिगवाक्षानिलःशीतः ॥

योजयितुंदूतीवक्ति गृहीत्यनेनावारितादित्यनेनच अर्थादोषवत्कामः प्रभुतात्केवलश्र
मःकरवत्क्लेषुदोषेषुत्रयादन्यत्रमन्मथइतिवत् तत्समायतयानायिकायाअपि अधिकानु
रागशालिपरपुरुषरतौसुखोत्तिमायइतिद्योत्यते अथवागृहीत्यनेननिरंतरमदनावधित्ति
शालितयाछनायकः परपुरुषाप्राप्तिसमयेपिभुक्तोसाकपइतिव्यज्यतेतेनचाधुनातमहमानय
मीतिव्यज्यते ॥ १८६

निरंतरनितांतमनकुपितांकांतासखीवक्ति। सततमिति भुजंगीवभुजंगी तत्संबुद्धिः
एवंचनवांतिकागमेनपिभीतिकत्याघ्रतइत्यावेघते निरंतरवक्रीकृतवदनेनकोपव
शादितिभावः पद्देस्वभावतएवारक्रवदनतं सविविषमिववाचांमुखंगिरंतीपदे

सततमरुणितमुखेसविनिगिरंतीगरलमिवसुसूक्ष्मम् अविगणित
नौषधिमंत्राभुजंगभुक्तेवरंजयसि ॥ सदिंनतदंबयत्रस्मारंस्मारं
वियोगदुःखानि आलिंगतिस्पागांढं पुनः पुनर्यामिनीप्रथमे ॥

गरलंगिरंती अविगणितौषधिमंत्रा अविगणितौषधितल्पविचार एवंचययोष
धिःपीडापहारकतयासवेकाविणीतयासविचारामद्रक्तिस्तहितकारिणी अहोपता
मपिनगणयसीत्यनुचितंतनवेतिध्वन्यते पद्देऔषधमंत्रादरपिनयत्रसमर्थ्यमितिभावः

गी॰
टी॰
१८७ (187)

रक्तांजनं विरंजयसि विरक्तं करोषि एतेन रुधिरवंतं रुधिररहितं करोषि एवं चैता
दृशा कोपवर्त्तया त्वया यत्रानुरक्तोपि जनः अनुरागशून्याः क्रियते तत्रानुरक्ता
नुरंजनं न वहुरायासमिति गम्यते कपटभावेनैवानयाश्वासनं क्रियते न वास्त
वमालिकं तेयति काश्चित्कंचिदन्यो न्नयावक्ति ॥ स्थलेति कमलिन्याः समीपे

स्थलकमलमुग्धवपुषामातंकाकस्मिनेकचरणेन
आश्वासयति विसिन्याः कूले बिसकंठिका शफरम् ॥

वलाकासंज्ञासंक्षीरे स्थितः एकचरणेनायस्पतेन स्थलकमलवत् सदृशशरीरेण मत्स्यं
विश्वासयति एवं च मत्स्य कमलभ्रमेण समीपागमनं भविष्यति ततश्चैनं ग्रासं विधे
यमिति यावत् स्त्रीभवति इत इति भावः एवं चेयं त्वदाश्रितस्य एतद्विश्वासेन वधेय इति सू १८७
च्यते ॥

काश्चित्कामीदुःप्रेयां नायिकामालोच्य समीरमुद्दिश्य एवं वक्ति । मन एवेति नावेदित
मुद्दितम् अत्यन्त गौरं नाभीमूलं स्रशुकरहितं कृत्वा अनया मे वितपवन त्वं किं कृतः म
लयाचलकटकात् पातोऽयेन एतादृशः किमिति वितर्कः एवं च यदि त्वया भृगुपा
तोऽनेन कृतः स्यात्तर्हि कथमनया विगलितलज्जया मे वितं स्यादतस्त्वैव तपस्या

मन एव पटमधिकगौरं नाभीमूलं ... शुकं कृत्वा अनया मे वितपव
न त्वं किं कृतमकलयभृगुपातः ॥

धिकामिति व्यज्यते तेन च त्वमेव धन्य इति
यद्वैतदपेत्तयाकिमधिकं फलमस्ति यल्लिप्सया मलयभृगुपातस्त्वकृत इति प्रश्नः एवं
चैतादृशस्त्वादन्य न पुरुषार्थ इत्यूपमिति व्यज्यते एतोत्तरमाप्य समधिकामाविर्भावं र
तार्थं पुनः प्रक्रान्तां कान्तामालोक्य नायकं वक्ति इवा ॥

गी॰ अद्दष्टवताश्रीस्तावदप्रयत्नेनापिलभ्यइतिकाश्चिद्भक्तिः सर्वांगमिति निखिलांगंस
मर्पयंतीचंचला अथचलोलेतिश्रीनाम श्रीः विपरीतरतविधायिन्येव शय्यायांश्रमेण
टी॰ श्रमे एवंचशय्यादिरचनामात्रोद्योगपालितंत्वज्यते उद्योगरहितमपिअपिःश्रमगम्य
१८८ त्वेति यद्वालोलेत्यत्रात्वेति अद्दष्ट्यालिंनेभजतेनपदेसंगमं सदिनमिति तदेवसमी

198

सर्वांगमर्पयंतीलोलामम्मश्रमेणशय्यायाम् अलसमपिभागवदंते
भजतेपुरुषायितेश्रीः सदिनंतदेवयत्त्वास्मारंस्मारंवियोगदुःखानि
आलिंगतिसागाढंपुनर्यामिनीप्रथमे ॥

वीनंयस्मिंस्त्विरहदुःखानिस्मृत्वास्मृत्वारात्र्याः प्रथमेप्रहरइतिभावः वारंवारंदृढंसाश्चालिं
गयिष्यतीत्यर्थः त्रियामेतिविहाययामिनीतिपदोपादानेननिखिलजनेजागरूकेपिसा
यंतनसमये एवंचालिंगनादिविधानेनविगलितलज्जात्वमुच्यतेपश्चिकाप्रेमस्नेनेमतंतत्

काचित्कांचिद्वक्ति सांतर्भयमिति भुजिष्या दासी तस्या नायकस्य अंतर्भयसहितं स्वामिनी ज्ञास्यतीति धियेतिभावः यथायथा सम्यगधिकं सजातानुरागवत्वादितिभावः सेवामाचरतीति तथातथा गृहिणी एवं च गृहकर्मव्याहतयेतादृशानुचिताचरणाज्ज्ञानवैधुर्यं व्यज्यते साशंकानर्थप्रतिभासहिता किमितीदानीमियं ममाधिकं सेवायां करोतीति धियेतिभावः सेर्ष्या समत्सरा प्रायेणायमस्मिन्रतिमतीति धियेतिभावः सभया लोकापवादादितिभावः अतएव गेहिनीतिपदमर्थवत् एवं च सर्वदा

सांतर्भयं भुजिष्या यथा यथाचरति सममधिकं सेवाम् साशंकसेर्ष्यसभया तथा तथा गेहिनी तस्याः ॥ सुंदरि दर्शयति यथा भवद्विपक्षस्य तत्सखी कांतिं ॥

स्वामिचरणपरिचरणं स्वयमेव विधेयं न तु गृहव्यापारवशाद्दास्यादिनेति ध्वन्यते नायको नायिकां वक्ति । सुंदरीति हे सुंदरि तस्यास्त्वत्सपत्न्याः सखी भवद्विपक्षस्य त्वत्सपत्न्याः कांतिं यथा दर्शयति । तथा त्वन्मातृदासस्य मम एवं च त्वदतिरिक्तायाः शोभा कथं न कथमिव मया सोढुं शक्यमिति व्यज्यते ॥ ॥

गी॰
टी॰
१८९
189

सद्वेषा दृष्टिः पतिता अर्थाद्द्विपक्षे एवं च त्वं दत्तिविज्ञाया: ~~शोभा कथनं कथमिव मया शेकुं शक्यमिति भज्जाते~~ न मयानुरागवशात् त्वद्विपक्षावलोकनं कृतं किंतु क्रोधवशादिति भावः॥ सपत्नीदुःखितां कांता नायकसखीं वक्ति॥ स्वाधीने इति॥ हे सखि स्वयंकर्तृशाकैः दंतक्षतनखक्षतपत्रलताप्रोंछनादिवापैः सुभगा सुभगेति॥ अनया त्वत्सपत्न्या स्पृष्टः

पतति तथा मम दृष्टिः संदिक्तदा सम्प्रसारूया॥ स्वाधीने रधरव्रणानखांकपत्रावलोपादिनाशायनैः सुभगा सुभगेत्यनया सखि निखिला सखिरतापत्नी॥

सममग्रापि पत्नीवाचालीकृता पत्नीपदे न आजं तेन च यथार्थज्ञानशून्यत्वं तेन चैतद्वचनमप्रमाणमिति व्यज्यते निवारणार्हत्वं सुखिरितेत्यनेन च सपत्नीयत्वं व्यज्यते एवं च नायको नैतस्यामनुरक्तो न वा तत्कृतानि दंतक्षतादीनि किंतु मिथ्येवलोके स्वसौभाग्यप्रकटनायास्वयमेव संपादितानीति विज्ञाय नायके मानादिकरणमनुचितं तवेति ध्वन्यते॥ १८९

काचित्कंचिद्वक्ति सरित इति यस्य मदेन सरित इव श्रेष्ठान्वयजाता यदेव महत्तमादिजन्याः
नार्यः स्पृशति दुःखोद्रेकवशादिति भावः यः स्वाराम्भवरी समास्वेव मध्यः समुद्रलहरीषु मेघ इव
त्वं स्पृशति एवं च यः कुलीनस्वनायिकास्वनाभिनंदति नस्पृशती स्वनायिकावाभिरेव भवज्यते यद्वा
परांगनालंपटं नायकं नायिका वक्ति जलनिधिपदेन नीचजन्यत्व मन्यांगनासु खन्यते ॥
जलदपदेन नायके मालिन्यं व्यज्यते ॥ नायकदूती नायिकां वक्ति ॥ सकलेति निखिलकंक

सरित इव यस्य गेहे स्पृशति विशालगोत्रजा नार्यः स्वाराम्भव स त्वं स्पृशति जलनिधि
लहरीषु जलद इव ॥ सकलकटकैककमंडनि कठिनीभूताप्ययं शिखरं दंति गिरिभुव
इव तव मन्ये मनः शिलासमभव ॥

णामस्वभूषणोपपत्ते कटकोद्दिनितंबः कठोरहृदये पत्ते कठिनी खटिका पद्मरागस्वपरदे प
दे शिखरश्रृंगं हे कोपने पर्वतभूमेरिव तव मनः पाषाणः पक्षे मनः शिलाधातुविशेषः स
जात इति तर्कयामि एवं च भवदेकशरणोचितमात्राचरणप्रवणोऽहि जरमणो नैवं विधं नेष्टुं य
तवकर्तुं समुचितमिति ध्वन्यते तेन चाव स्पंनमनुसरेति ॥ ११५

उं॰ गो॰ टी॰ १६०
190

सखीनायिकां वक्ति सखीति हे सखि दुरवगाहः केनाप्युपायेन वारयितुमशक्यः सचासौ गहनः
बहुतर इत्यर्थः पक्षे केनाप्युपायेनाकलयितुमशक्यः कुटिलाशय इत्यर्थः प्रियजनेपि नायके
पि आधिः कोपकरणानर्हत्वमावेदयति पक्षे स्वेप्सितजनेपि एवं किमुतान्यत्रेति भावः विप्रि
यं दुःखं विदधानः विनतं यन्मुखं तस्योपरि स्थितः पक्षे साधोः उपरिस्थितः साधोः क्लेशद इत्यर्थः
एवं च दुष्ट स्वदुष्टाङ्गीति साधुत्वेनेत्यर्थः दुष्ट इव तत्कोपः दुर्लक्ष्यः ज्ञातुमशक्यः पक्षे दुष्टमशक्यः

सखि दुरवगाहगहनो विदधानो विप्रियं प्रियजनेपि खल इव दुर्लक्ष्यस्तव
विनतमुखस्योपरि स्थितः कोपः ॥

एवं चैतादृशकोपकोप करणमनुचितं न वेति धृष्यते ॥
विनयमुखोपस्थित इति पाठे विनयः मुखे अग्रे यस्य तादृश उपस्थितः जात इत्यर्थः एवं चैतादृ
शविनयप्रदर्शनमयोग्यादृशामिमेमातीति व्यज्यते पक्षे विनयो मुखे यस्य न तु हृदये इति भावः
दुर्लक्ष्यः विनयमुखत्वादेव तन्मयत्र भावः पक्षे प्राग्वत् एवेत्यर्थः प्रियजनेपि विप्रियं दधानः प्रि
ये विनयप्रदर्शनस्यादासीनत्वप्रदर्शकत्वादिति भावः पक्षे प्राग्वत् हे सखि खल इव तव कोपः एवं
चैतादृशकोपकरणमनुचितं न वेति भाव इत्यर्थः ॥

कथमियमस्पर्शिविवाहोत्सवेनावलोकयतीतिवादिनं नविदितनहृत्तांतः कश्चिद्वक्ति ॥ स्वेदेति ॥
स्वेदेनत्वरण्यानेजेनेतिभावः सवसनस्नानशालिनीसप्तपदसमाहात्म्यरूपाः सप्तमंडलीः अतिक्रामती
मदनरूपोयोदहनः तस्ययोविकारस्तन्माहिनाचित्तहारिणीलज्जितानम्रीभवति एवंचानयात्वद्वि
न्नसप्तपदत्तमतएवाग्निदिक्षोस्वेदरूपजलेसवसनास्तुता सप्तपदीरूपसप्तमंडलातिक्रमकारिणी
मदनरूपाग्निदाहशालिनीसंजातापुनर्हिमत्तयालज्जावशाद्वामीचतत्रइतिभावः एवंचत्वद्विष
यकलज्जावशादेवमुत्त्रीयते यदियंविहितेपिविवाहेनत्वांत्पश्यतीतिमन्यते अत्रोपितस्करः

स्वेदसचेलस्नातासप्तपदीसप्तमंडलीर्यातिसप्तमदनविकारामनोहरगात्री
डितानमति ॥

संजातदिग्रूषणाः किमिदानींमयावक्तव्यमि तिविगलितधिषणाः धस्तादेवविलो
यन्नास्तेइतिलौकिकं यदानायकोनायिकामत्वीवक्ति एवंचेयमन्मनोरूपवस्तु हृतवतीवैवाहिक
कृत्यादिक्षेपिमुग्धाभाववतीममहृतवस्तुमददती मयेयंभुजपाशेनबद्धानिर्दयंमर्दयित्वामृष्टाभिद्या
तेहरमितानाड्यित्वा दंतनखक्षतैस्मलिंशाभागिनीविधेयात्स्त्वभवत्पानेतत्पश्वमरक्षणात्तणामपि
विधेयमितिज्ञायते तेनचकृतविवाहामय्येनांनमुंचामीति यदामनोहरामंदरीलज्जितानमतिस्वेदे

गो॰ त्यादिविशेषणस्यासमपदीत्यादिविशेषणाहेतुगर्भपर्वचनितं वादिशाद्यास्यमावेद्यते लज्जायांतु
टी॰ स्वेदादिनामदीयमदनविकारयभिशतद्दतिधीरैः पर्वचेनादशप्रोदापरिणायपवसमागि
११ ति इतिकश्चित्कंचिद्वक्तीत्यर्थः ॥ समीचीनायामप्यसमीचीनसंसर्गादन्यथाभावोभ
१॥ वतीतिकश्चित्कंचिद्वक्ति ॥ सरसेति समीचीनरसः प्रकर्षेणावर्तमानः पद्ये समीचीनरस
वान्समानाचरणावत्ता पदेपकजातीयच्छंदसामयंसमुदायः काव्यस्यसर्गइवान्यादृशाचर

सरसप्रवर्त्तमानःसंघातोयंसमानवृत्तानां पद्यैर्वैभिन्नवृत्तैर्भंगुरितः
काव्यसर्गइव ॥

प्रवणेः पद्यैर्विजातीयच्छंदोभिः पदैव एवकारेणाबद्धकावस्थितेनाकिंभविष्यतीतितन्नवि
दाइतिव्यज्यते भंगुरितः कुटिलीकृतः पद्येसमापितः एवचासत्संगतिरनुचितेतिध्वन्यते यद्वा
सर्वेष्वेनेसमीचीनामत्यादाय्यपदार्थपवस्थितः परमपुनेवकेश्चिदुष्टैःसंगत्यान्यथाभावंनी
ताइतिकश्चित्कंचिद्वक्ति ६७॥ । कश्चित्साधोयंवक्ति । सर्वासामिति हेसर्वासामेवस्त्रीत्व
साधारणाधर्मवर्त्तयतिभावः सरतंपयइवदुग्धमिवसमीचीनंत्वावर्त्तितदुग्धमिवतस्यापव ९९।

पुनः पुनरावृत्तो स्मरतं मधुरं एवं च सर्वकामिनीनां स्मरतं सम्यगेव परमिदमधिकं तस्याय इत्त
रो स्मरते माधुर्यमिति भावः एवं चान्यासां प्रथमत एव माधुर्यं न पुनरावृत्तेरुत्तरत इति व्यज्यते तेन
च तत्कल्पानामन्यानायिकेति यद्वा सर्वासामिव पुनः पुनरावृत्तो स्मरतं जलमिव मनोहारि पुनः
पुनरावृत्तो तस्या एव स्मरतं दुग्धमिव मधुरं एवं च यथा जलदुग्धयोर्महदन्तरं तथान्यासां तस्याश्चो
त्तरोत्तरस्मरत इति व्यज्यते प्रथमव्याख्याने पयः पदस्थाने दुग्धपदस्थाने पयः पदं देवतमयत्रे
कपदस्थाने सुचितम्॥ काचित्किंचिद्वक्ति स्वप्नेति अपिना इतरकालसंग्रहः नर्मसुचस्मि॥

सर्वासामिव सख्य एव यद्व स्मरतं मनोहारि तस्या एव पुनः पुनरावृत्तो दुग्धमिव मधुरं॥
स्वप्नेऽपि यान्नर्मचसि यातेऽन्याहृदिग्राहृदिस्थापि दृष्टा न बुद्धिमिव तां गूढव्यभिचारिणी

एवं चामन्यत इति प्रायोपोयान्यते एते स्वप्नेऽपि वृद्धेः सत्वात् यथा श्रुतया हृदिस्था॥ वेत्मि॥
पितयेति भावः अनुपश्वाप्रादिनीपरपुरुषमिति भावः एवं च यान्त्वं सदा ध्यायसि मा त्वयि का
चिन्त्यमपि गते परं पुरुषमभिलषतीति भावः अथवा त्वद्धृदिस्थापि परपुरुषानुग्रहवती
त्यर्थः एवं च त्वद्धृदिस्थितिकालेऽपि परपुरुषे मनः कुरुते याऽस्मात्तस्यास्त्वं किं करिष्यतीति तन्न
विद्म इति व्यज्यते यातावानुग्रहकारिणीत्वेनाभिमता एवं च कामलं तस्याप्य

गो॰ नुग्रहो नास्तीत्यर्थः एते याते अविद्यमाने वस्तुनीति भावः अनुग्राहिणी अविद्यमान
टी॰ वस्तुविषयिणीत्यर्थः अपि सर्वसमुच्चायकः तां दृष्ट्वा बुद्धिमिव गुप्तमभिचारकारिणीं एते
१९२ ऊटित्यजेयम् अतस्त्वं तां न जानासि एवं चैतादृशदृष्ट्या ग्रामास्तक्तिं संपादनं तवानुचितमिति
सूच्यते ॥ कश्चित्कंचिद्वक्ति सपरावृत्तीति हे अनवद्यांगि एवं च स्पृहणीयत्वमावेद्यते ।
192 परावृत्तिसहितं चलंती पुनः पुनः पश्चान्निरीक्षमाणा चलंतीत्यर्थः त्वमित्यस्यानुपादान

सपरावृत्ति चरंतीवात्यवत्रणामनेनानवद्यांगि हर

लोकभीतिभावेदयति एते परिभ्रमणावतीमात्रः ममेति पदानुपादानेन यदीदं मनो मदी
यस्यान्तर्हितं त्वत्कृते तादृशेन तद्वस्था कथं मया द्रष्टुं शक्यते इति सूच्यते यद्वा मदीयत्वेन ज्ञाते मनसि
इतोप्यधिकतरपीडां न याविधेयेति भीतिरावेद्यते वात्यात्रणामिव हरसि अवलोकनेन स्वा
धीनं करोषि त्वय्यासक्तं भवतीति भावः ॥ १९२

त्तिपसि अनवलोकनेनाहमेतयानानुगृहीतमितिदुःखभाजं करोषीतिभावः तरलयसि
पुनरवलोकनेनमय्यनुग्रहंभवतीतिधैर्येयंमर्याऽचलेयंतत्त्वेतिवाचलत्वभाजंकरोषीतिभावः भ्रम
यसिपुनरवलोकनेन अज्ञानशालिनंकरोषि सर्वथाकिंकर्तव्यतामूढं संजातमितिभावः एवंच
त्तरांधैर्यशालित्तरामधैर्यशालिनं हतमितिभावः पातयसिमूर्छितंकरोषि पुनरवलोक

स्मितिपतरलयसिभ्रमयसितोलयसिपातयसि ॥१॥
साबहुलक्षणाभावास्त्रीमात्रेनेतिकितवतवत्वं ।

नादितिभावः एवंचत्वत्कटाक्षरूपसायकैरसमसायकेनभूयोजर्जरीकृतंछिन्नैः प्राणैरिवसं
जातमितिभावः अन्योपिकश्चिद्धीरः पुनर्हन्यमानोपिमूर्छितोभवतीतिलौकिकं एवंचनि
रपराधिनोममैतादृशदुःखविधानेकथंनापराध्यतिभवतीतिव्यज्यते ।६०२ नायिकासखीनायकं
वक्ति सेति हे कितव एवंचैतादृशत्वद्बुद्धिशालित्वमुचितमितिव्यज्यते तवबहूनियानिलक्ष
णानिस्खलायरत्नादीनितेषांभावः सत्तायस्यांसा यद्वाबहुलापदंलक्षणाउत्सवीः तेयेभ्यपक्षादृशा
भावाःविलासाःयस्यांसाएवंचैतानायिकातोधिकत्वमावेद्यते

गी॰ टी॰ १९३ 193

एतेबहूनांसमग्राणांलक्षणामालोकनोभावश्छिन्नाभिप्रायोयस्याःसाएतादृशीसानायिकाहि
मात्रैवाइति नव एवंचाऽन्यस्यनेतादृशीमतिरितिभावः तुल्य मात्रपदेनलक्षणादिसत्वविर
हस्त्वावेद्यते अमुमेवार्थमर्थान्तरन्यासेनद्रढयति द्यूतविधिसंबंधीकोटीः कोटिसंख्याकंवस्तु
कपर्दिकावासर्वपणः यद्वाद्यूतीविधिः कर्तव्यार्थोयस्य तस्यविधिपदमवश्यकर्तव्य
त्वमावेदयति एवंचयथाद्यूतासक्तस्यकोटिसंख्याकंवस्तुसममधिकंवराटिकान्येनतिरस्कारश्चएतं

कोटिर्वराटिकावाद्यूतविधेःसर्वपणः ॥ साविरहदहनदूनाम्रियतामृत्वापिजी
वतिवराकीसा साग्यैवकितवभवतानुकूलितापातितादेण ॥

तथाप्यतिर्मस्यतवविशेषज्ञानशून्यत्वमितिभावः एवंचगुणानभिज्ञतयात्वयानामत्सर्वविहाया
न्यत्रासक्तिः क्रियतइतिव्यज्यते ॥ सखीनायकंवक्ति । सेति हेकितवपातितायूतेणहृतकटादे
णापदेशेऽत्रःपाशः भवताऽनुकूलिता स्वाधीनीकृता एतेसंचरणात्तमीकृताविरहानलखिन्ना
सावरा एवंचसरलत्वमावेद्यते चतुरंगुटिकेवमृत्वापिजीवति एवंचतस्यास्त्वत्कटाक्षमात्रेणजी
वनमन्यथामरणमेवेतिभावः एवंच याहिस्वदर्शनादिनानोपायैः स्वाधीनतांनीता तस्यांपुनरौद
सीन्यसंपादनंकथमतोचितेनानुहतिइति व्यज्यते तेनचसात्वयानुग्राह्येति १९३

पतेमरणंक्रीडनादसत्वंजीवनंततस्तन्नमंत्वं नायिकासखीवक्ति स्पर्शादिति निदाघः प्रियइ एवंच
निवारणानर्हत्वंध्वन्यते स्पर्शमात्रात् एवंच किंचित्कालांतरंकिमनेनविधेयमितिनविद्मइतिव्यज्यते।
पत्तेरतादिजन्यावस्थावक्तुंनशक्नोतीतिव्यज्यते स्वेदंकरोतीतिनिद्राकर्तृत्वमेनददाति जघनस्थवपिव
मनमपिनक्षमते उभयत्रजघनवसनसत्वमावश्यकं तदभावेकावार्त्तालेकरणादीनांकाचवार्त्ता
चटिकादीनामितिभावः एवंचप्रतिक्षणंदृढतररतकारीमत्प्रियतमइतिव्यज्यते एवंचेतादृशानिदा
घकालेपिप्रियतममंतरानावस्थातुंशक्यमतस्त्वरस्वतदानयनार्थमितिध्वन्यते ।। इतीनायकंवक्ति ।।

स्पर्शादेवस्वेदंजनयतिनचमेददातिनिद्रांतु प्रियइवजघनांशुकमपिननिदाघःक्षण
मपिक्षमते ।। साभवतोभावनयासमयविरुद्धमनोभवबाला सहकारलतेवसुंदरदोहदशङ्कोपा
फलंवहति ।।

मेति हेसुंदर एवंचासक्तियोग्यत्वं व्यज्यते यद्वैतद्दोहदविशेषणांनूतनलतानूत
नपदेनचिरभाविफलयोग्यत्वंध्वन्यते दोहदस्पृशङ्कयाफलमिवसावालाभवतःनिरंतरचिंतनेसम
यविरुद्धंवाल्यादिमनोभवोद्रेकत्वविरुद्धमितिभावः फलविशेषणामप्यनन्तु मन्मथंवहति एवंच
सामदनकलाकलापानभिज्ञेतिनमंतव्यमितिव्यज्यते तेनचाभुक्तभोगात्वाधिकंकिमपिसुखंम
तस्त्वरस्वदर्शनायेति ।।

गो. टी. १९४ 195

नायिका सखीं नायकं वक्ति स्पृशतीति स्तनैः स्पृशति न च विलिखति नखाग्रस्पर्शसंपादनेन
मदवत्त्वं नखक्षतादिः करणेन लज्जावत्त्वमावेद्यते चिचयं तत्करकलितमिति भावः गृह्णाति न
न च विमोचयति गृह्णातीत्यनेन लज्जावत्त्वं न विमोचयतीत्यनेन मदनवत्त्वं ध्वन्यते न च मुञ्चति गतेन
प्रयच्छति न वा गच्छतीत्यर्थः न च मर्दयति न मर्दयतीत्यनेन मान्मथ्यस्पृष्टचेष्टाद्यकरणेन लज्जावत्त्वं
व्यज्यते एवं च मध्यमस्वभावादियमेतादृशी नवोढा पद्मिनीत्यनेनाभीतिमुत्सृज्यैनां निगृह्य स्वामि

स्पृशति न नखैर्न च विलिखति सिचयं गृह्णाति न च विमोचयति न च मुञ्चति न च मर्दयति नय
ति निशां मानिनि द्राति ।। स्तनजघनमुखममुष्या लङ्घितमध्याः सखे मम कटाक्षः नोज्झति रोप
स्तस्याः स्तनतटद्वयतीर्थकाकरव ।।

लङ्घितं संपादयतीति ध्वन्यते ।। नायकः सखायं
वक्ति स्तनेति तीर्थसंबंधिकाकः तयास्तनतटद्वयमिव लङ्घितमध्यमः कटिर्येन सूक्ष्मत्वादिति भावः
पक्षे लङ्घितप्रवाहः मम कटाक्षः तस्या उन्नततटद्वयविशेषणमप्येतत् स्तनजघनप्राप्येऽगत्वा
देकवद्भावः नोज्झति तीर्थकाक इत्यनेन कटाक्षे काकोपमेयतया नायिकायां तीर्थरूपत्वप्रतिपाद
नेन प्राक्तनकृतसुकृतसमूहैकलभ्यत्वं नायिकायामावेद्यते लङ्घितमध्यममित्यनेन मध्यपाते जी
वनमेवासंभवीति व्यज्यते तस्याः स्तने कदाचिज्जघने वा दृष्टिर्मम आवतिष्ठते नान्यत्रेति भावः

एवंचनस्यामामास्पृक्षिस्त्वयानविधेयेतिनाहमुपदेष्टव्यइतिव्यज्यते नायकः सखायंवक्ति सव्रीडेति
आईषत्कोपमेत्य लज्जास्मितंकिंचिन्मन्दस्मितंसहितं सख्यादिविलोकनाल्लज्जाः कथममयमकस्मादे
वमयंपतीषुनाहृगाचरणाप्रवृत्तइति विस्मयेनास्मितंमन्मथविभावाच्चमंदस्मासितंमामास्पृशइति
कथयंत्याप्रियया वातायनंपिधायस्थितं एवंचसख्यादिदृगविषयतासंपादनेनयथेच्छरत्यनुम
तेर्दत्तेतिध्वन्यते तेनचैताहृशीनान्याचतुरेति॥ नायकःसखायंवक्ति सकरेति। करग्रहणस
हितंनिषेधार्थमितिभावः सरुदितं आसहात्वज्ञापनायेतिभावः सादेयईदृशोकस्तवैकथ

सव्रीडास्मितमंदपक्ष्मस्मितंमांमास्पृशेतिशंसत्या आकोपमेत्यवातायनंपिधायस्थितं
प्रियया॥ सकरग्रहंरुदितंसादेपंसनवमुष्टिमगीषं॥

मनीदृशंविपीयतइत्यादेपसहितमित्यर्थः नवमुष्टिमदितं जेतुमिच्छाजिगीषातत्सहितंसकर
ग्रहंरुदितमित्यनेननायककामसंदीपननिपुणत्वं अथवाकोमलांगीत्वं सादेपमित्यनेनका
मतंत्रनिपुणत्वंसनवमुष्टिमज्जिगीषमित्यनेनरसनिमग्नमानसत्वंनायिकायामावेद्यते॥
राम॥

गी०
टी०
१९५ 195

तस्याः स्मरं तं स्मरंतं हितीयं स्मरंतपदे यस्य मित्राणां मित्राणि त्यादिवत् मत्सखाविपाय जनकमित्यर्थो तरसंक्रामतिवाच्यं अनतएव नस्मरंतात् अन्यः प्राजापत्य क्रतुः स्मरंतपदेनकालांतरभाविफलव्य ज्यते तेनचैतदतिरिक्तपत्नीस्मरंतंपुत्रादिजननोत्तरं मत्स्वर्दनतदानीमेवेत्यनेनापीयमेवममातिशय प्रेमवतीति दुर्जननिंदाभियापुरुषेमानसमकुर्वाणानायिकाइतीवक्ति। सखीति। हेसखिएवंच

तस्याः स्मरंतं स्मरंतं प्राजापत्यः क्रतुरन्तोन्यः ॥ सखिनखलनिर्मूलानांविदध
त्यभिधानम पिमत्स्वेमलिनाः केनाश्राविपिकानांकुहूविहायतरः पाहुः ॥

हितोपदेशकथनार्हत्वंद्योत्यते मलिनाः निर्मलामनाममभिधानमपि अपिनासंगत्यादेर्विदासः निश्चयेननविदधाति अममेवार्थमर्थांतरोपन्यासेनदृढयति पिकानांकुहूंविहाय अन्यःशब्दः केनअश्रावितकेनापीत्यर्थः एवंचमलिनात्कृतैः किंचिन्मनसिदुःखंविधेयमित्यावेद्यते। तेनचभीतिमुत्सृज्यस्वाभिलाषितंयथेष्टंसमाचरयेति। १४९॥ १९५

क्वाचिल्लघुनापि समीचीनफलदेनेति कश्चित्कं किंचिद्वक्ति स्वल्पा इति येरघुपतिसेव्यैः स्वल्पा इति हेतोः
सम्यग्ज्ञानेन नदिमानैः शैलाः स्थितिमेनो भवन्तीति भावः जाताः सेतालाघवेनैव बद्ध्यमानः महत्वपरिमाण
स्थितिशालित्वादिति भावः नायिका मानवती नायकं वक्ति सेति असंबुद्धिपदानुपादानं नायकविषय
कक्रोधव्यञ्जनामावेदयति यथा माघोऽयं वार्षिकी पेतश्यामवर्णा कृष्णांगी पदे स्थलेन रामा नायि
का विरहताश्लोतोपचारेणातीव्रः अधिकरूपार्थः विरहेण हन्यां हि मनेव पाण्डुतानीता एवंच त

स्वल्पा इति रामवलैर्येन्यस्ता नाशोयपयोराशेः नेशैलाः स्थितिमेतो हं तलघिमैव बद्ध
मानः ॥ साश्यानत्वोदहनाश्लोतोपचारतीव्रेण विरहेणापाण्डिमानतीनाद्धिनेनह्रूवे
ने ॥

द्विरहाविन्नासात्वयानुगृह्णेति व्यज्यते सा पतिमात्रानुरागिणी कथं त्वया सह संगम
नीयेति वादिनी मानवती नायको वक्ति स्वनिरीक्षितेनेति हे सखि साउत्कृष्टकंपसहितेन पृतस्पाः पतिरी
त्तितिरितिधियेति भावः सोत्कंपेनेत्यनेन सेकचमत्कारपूर्वकत्वाभावो व्यज्यते सखामिक्ताजलेनेति
भावः यादृक्तु दृष्यति स्म ममत्वाभवति वा दृक् सम्यक् समीचीनविलोकनकारी निश्चलदृक्तः यः प्रियत
मस्तेनथाराजलमिक्तानमायति स्म पुनिरीक्षितेत्यादिना सेकचमत्कारपूर्वकत्वमावद्यते एवंच
एवंच सामय्यनुरक्तेति विज्ञायते अतः सात्वया मया सह संगमनीयेति व्यज्यते ॥

गो॰ दूतीनायिकावक्ति सखीति हे सखि एवंच हितोपदेशार्दत्वं त्वयि निःफलीकृतमन्मथ

टी॰ पतिमात्रानुरागिणीनवस्मादरंकः कुरुते न कोपीत्यर्थः अमुमेवार्थमर्थान्तरन्यासेन द्रढयति

९६ भगवानपि स हरः शिवचतुर्दशीकामत्रयोदशीतद्विधवान पूज्यः एवं च केवलस्य पूज्यार्हत्व

१९६ पितद्भावेन कामविरहतयैव पूजार्हता हरस्य तत्र कावार्तान्यस्येति भावः एवं च मा च फाल्गु

196

स निरीक्षित निष्फलकरवल्लभपाराननलोचितानन तथा स कोपेन मयामवविमिक्ता

सामाघतिस्मयया ॥ सखिमोच्चीकृतमदनपतिव्रतेनकस्तुवादरं कुरुते नाश्लोषी

भगवानपि स कामविद्धो हरः पूज्यः ॥

नयोर्मध्ये असितायाचतुर्दशी अनंगेन समायुक्ता कर्तव्या सदा तिथिरिति वचनात् यत्राचेतन

द्रूपस्याशिवचतुर्दशीदिवसस्यापि कामाभिधानत्रयोदशीविद्धतयैव पूज्यतामिधानं धर्मिणोह्व

पि तत्र कावार्ता सचेतनस्य लोकस्येति ज्ञायते ॥

९६

नायकोनायिकांवक्ति सेति हंतविदेनवोढां दृष्ट्वावयुमप्रियाज्ञानइत्यहंमन्यायतः मयिरद्मस्ये
प्ययेति सादामवृद्धिर्नपूर्ववद्यथामप्यनुग्रहहलथानाधुनेत्यर्थः सारतिर्नपूर्ववद्वत्तीतितिर्नेत्यर्थः
सामन्मथविकारजेतिभावः लज्जानपूर्ववोप्रियतमोयमितिवुद्ध्याःत्पसमंदलज्जांकुर्वतीस्थितेत
दानींतद्दुह्यभावान्मदभाववतीहृतासीतिभावः क्वचिन्नापित्रेयेतिपाठः सविश्वासोनयद्वाना
यिकामत्वीवक्ति हेसखिमयिस्थितायांपवंचमरसमंदकानानोस्येतिभावः सप्दामवृद्धिनय

सामयिपनवामवृद्धिर्नरतिर्नापत्रपानविश्वासः
हंतनिरीक्ष्यनवोढांमत्येवयमप्रियाज्ञाता ॥

थापूर्वंदामवदात्ताकुर्वन्नस्थितमलथाधुनानेत्यर्थः नप्रीतिः नापिलज्जाअपिभयसमुद्धायकः प
वंचपूर्वमपिस्थितामेतेनकेदाचिदस्याःदुःखंभविष्यतीतिभियात्यस्याःपुरिहासोपिनकृतइदा
नींमामगणयित्वानिर्लज्जनयाव्यवहारतीतिभावः नकिंचिद्विश्वासः किंचिद्दत्त्वाद्यपिसहल
नार्पयतीतिभावः अतोनवोढांनिरीक्ष्यवयंअप्रियाजानाहंतइत्यहंमन्येतिरीत्येयमेनेनसंगेमे
किमनेनविधेयंलन्नविज्ञायतेमयेतिमन्यते पवंचसपत्नीसत्वमात्रमप्येतादृशाद्दुःखदंकिंपुनः

नसाधान्यमितिमन्यते ॥

काञ्चित्कांचिदुक्तिं सूचयति निशि भुक्ता नखदानवर्ज्यं गृहिणी अस्मिन्नचिरकाले नागते प्रिये इति भावः प्रातःकाले धवलनखाचिह्नं स्वशरीरं कुङ्कुमार्द्रतां भावयन्ती न दर्शयति कुङ्कुमार्द्रमेव दर्शयतीत्यर्थः सुचिरायात इत्यनेन नायिकाया मन्यन्नासक्तिं संपादनयोग्यत्वं नायके च मन्मथविह्वलनयामत्यक निरीक्षणाभावेऽपि रतकारित्वमावेद्यते गृहिणीत्यनेन स्वात्मनि तेन चान्यकर्तृकनिवारणानर्हत्वं व्यज्यते निशीत्यनेन दर्शनानर्हत्वं नखक्षतेषु ध्वन्यते दिनमुख इत्यनेन नखक्षतेषु दर्शनयोग्यत्वं द्योत्यते।

सुचिरायाते गृहिणी निशि भुक्ता दिनमुखे विदग्धेयं धवलनखाङ्कं
निजवपुरकुङ्कुमार्द्रं न दर्शयति ॥

विदग्धपदेन वचनानिपुणत्वं व्यज्यते धवलपदेन नखक्षतेषु प्राचीनत्वं धवलनखाङ्कमित्यनेन यथास्थितशरीरस्य दर्शनायोग्यत्वं द्योत्यते अकुङ्कुमार्द्रं न दर्शयति इत्यनेन प्राचीननखक्षतेष्वपि नवीनत्वभ्रमोदयेन शाकरूपानुचितावरणगोपा[illegible]नमभिव्यज्यते एवं चैवंविधचतुरयेवैतादृशाचरणाकर्तृत्वानाम्बोधितव्यज्यते तेन नखनत्वयति यद्वैतादृशीत्यापि नायकः प्रतारयितं शक्य अनेन खण्डनादिभीतिशून्यत्वं व्यज्यमर्म्मं अंगीकुर्वन्ति नायिका दूतीवक्ति ॥

नायिना नायकं वक्ति स्तनेति हे प्रिय स्तनजघनोरुश्रीतिमान् यदेकामं तन्नेपतस्याने पुनर्वदन्त
दानाद्यभिधानात् प्रत्यर्थं लग्नः दृष्टालिंगनप्रवणाइत्यर्थः यद्वेप्रत्यंतेनिखानइत्यर्थः निवेशितस्ने
हः कृतप्रीति यद्वेदमनेतलः पीडेपशामनार्थमितिभावः यतादृशस्तनेनलोक इवयत् विरज्यसेवि
रक्ताभवसि यद्वेत्तथिरस्मृत्यः इयंकालपरिणतिः एवंचदानीतनकालस्यैवायमपराधोनतवेतिभा
वः नलोकोपिवद्धकालेनसुक्तोभवतियद्वायद्विरयंकालपरिणतिरितिकाकाचिरकालसंगतेरि

स्तनजघनोरुप्रणयीगाढंलग्नोनिवेशितस्नेहः प्रियकालपरिणतिरियंविरज्यसेयत्
न्नलोक इव ॥ मचिरायानेगृहिणीनिशिभुक्तादिनमखेविदग्धयंधवलनलोकंनि
जवपुरकुंकुमार्द्रेनदर्शयति ॥

दृफलमित्यर्थः एवंचयथायथाचिरका लेनसंगतिस्तथास्मता
प्रीत्युत्कर्षः खलानांपुनरन्यथाभावइतिभावः ॥ नायिकादूतीनायकंवक्ति ॥ मेति ॥ निरछायाप्र
